# ॥ शंकररत्नावली ॥

# FOUR EPISODES

FROM THE

# MAHÂBHÂRATA

PRESCRIBED BY THE

## BOMBAY UNIVERSITY

FOR THE

## JUGGONATH SUNKERSETT SANSKRIT SCHOLARSHIPS.

---

Printed for the Department of Public Instruction.

---

Bombay:
PRINTED AT THE
BOMBAY EDUCATION SOCIETY'S PRESS, BYCULLA.

---

1866.

*Price* 14 *Annas.*

Digitized by Google

IndL

HARVARD COLLEGE LIBRARY
FROM THE ESTATE OF
CHARLES JOSEPH WELLS FARNAM
MARCH 15, 1911



Digitized by Google

Holtzmann II. 83 Bibliographie
iii 103
70
70 Nikkinitha exp. in abbreviation
iv. 17
34
46
177
193
ब्रह्मा
विवस्वान्-
III.
III. 187/12746/
H9. p. 116

## ॥ मत्स्योपाख्यानम् ॥

॥ मार्कण्डेय उवाच ॥

Ind Stud. i. 161
" Strip. i. 9
Muir OTT. i² 181, 190
CB. i. 1. 1 14

विवस्वतः सुतो राजन्महर्षिः स प्रतापवान् ।
बभूव नरशार्दूलः प्रजापतिसमद्युतिः ॥ १ ॥
ओजसा तेजसा लक्ष्म्या तपसा च विशेषतः ।
अतिचक्राम पितरं मनुः स्वं च पितामहम् ॥ २ ॥
ऊर्ध्ववाहुर्विशालायां बदर्यां स नराधिपः ।
एकपादस्थितस्तीव्रं चचार स महत्तपः ॥ ३ ॥
अवाक्शिरास्तथा चापि नेत्रैरनिमिषैर्दृढम् ।
सोतप्यत तपो घोरं वर्षाणामयुतं तदा ॥ ४ ॥
तं कदाचित्तपस्यन्तमार्द्रचीरजटाधरम् ।
वीरिणीतीरमागम्य मत्स्यो वचनमब्रवीत् ॥ ५ ॥
भगवन्क्षुद्रमत्स्योस्मि बलवद्भ्यो भयं मम ।
मत्स्येभ्यो हि ततो मां त्वं त्रातुमर्हसि सुव्रत ॥ ६ ॥
दुर्बलं बलवन्तो हि मत्स्या मत्स्यं विशेषतः ।
खादयन्ति तथा वृत्तिर्विहिता नः सनातनी ॥ ७ ॥
तस्माद्भयार्तान्महतो मज्जन्तं मां विशेषतः ।
त्रातुमर्हसि कर्तास्मि कृते प्रतिकृतं तव ॥ ८ ॥

॥ मार्कण्डेय उवाच ॥

स मत्स्यवचनं श्रुत्वा कृपयाभिपरिप्लुतः ।
मनुर्वैवस्वतोगृह्णात्तं मत्स्यं पाणिना स्वयम् ॥ ९ ॥

Digitized by Google

उदकान्तमुपानीय मत्स्यं वैवस्वतो मनुः ।
अलिञ्जरे प्राक्षिपत्स चन्द्रांशुसदृशप्रभे ॥ १० ॥
स तत्र ववृधे राजन्मत्स्यः परमसत्कृतः ।
पुत्रवच्चाकरोत्तस्मिन्मनुर्भावं विशेषतः ॥ ११ ॥
अथ कालेन महता स मत्स्यः सुमहानभूत् ।
अलिञ्जरे यदा चैव नासौ समभवत्किल ॥ १२ ॥
अथ मत्स्यो मनुं दृष्ट्वा पुनरेवाभ्यभाषत ।
भगवन्साधो मेद्यान्यत्स्थानं सम्प्रतिपादय ॥ १३ ॥
उद्धृत्यालिञ्जरात्तस्मात्ततः स भगवान्मनुः ।
तं मत्स्यमनयद्वापीं महतीं स मनुस्तदा ॥ १४ ॥
तत्र तं प्राक्षिपच्चापि मनुः परपुरंजयः
अथावर्धत मत्स्यः स पुनर्वर्षगणान्बहून् ॥ १५ ॥
त्रियोजनायता वापी विस्तृता चापि योजनम् ।
तस्यां न स्थातुमशकन्मत्स्यो राजीवलोचनः ॥ १६ ॥
विचेष्टितुं वा कौन्तेय मत्स्यो वाप्यां विशांपते ।
मनुं मत्स्यस्ततो दृष्ट्वा पुनरेवाभ्यभाषत ॥ १७ ॥
नय मां भगवन्साधो समुद्रमहिषीं प्रभो ।
गङ्गां तत्र निवत्स्यामि यथा वा तात मन्यसे ॥ १८ ॥
निदेशे हि मया तुभ्यं स्थातव्यमनसूयता ।
वृद्धिर्हि परमा प्राप्ता त्वत्कृतेयं मयानघ ॥ १९ ॥
एवमुक्तो मनुर्मत्स्यमनयद्भगवान्वशी ।
नदीं गङ्गां तत्र चैनं स्वयं प्राक्षिपदच्युतः ॥ २० ॥

Digitized by Google

स तत्र ववृधे मत्स्यः कंचित्कालमरिन्दम ।
ततः पुनर्मनुं दृष्ट्वा मत्स्यो वचनमब्रवीत् ॥ २१ ॥
गङ्गायां हि न शक्नोमि बृहत्त्वाच्चेष्टितुं प्रभो ।
समुद्रं नय मामाशु प्रसीद भगवन्मम ॥ २२ ॥
उद्धृत्य गङ्गासलिलात्ततो मत्स्यं मनुः स्वयम् ।
समुद्रमनयत्पार्थ तत्र चैनमवासृजत् ॥ २३ ॥
सुमहानपि मत्स्यस्तु स मनोर्नयतस्तदा ।
आसीद्यथेष्टहार्यश्च स्पर्शगन्धसुखश्च वै ॥ २४ ॥
यदा समुद्रे प्रक्षिप्तः स मत्स्यो मनुना तदा ।
तत एनमिदं वाक्यं स्मयमान इवाब्रवीत् ॥ २५ ॥
भगवन्हि कृता रक्षा त्वया सर्वा विशेषतः ।
प्राप्तकालं तु यत्कार्यं त्वया तच्छ्रूयतां मम ॥ २६ ॥
अचिराद्भगवन् भीममिदं स्थावरजङ्गमम् ।
सर्वतो हि महाभाग प्रलयं वै गमिष्यति ॥ २७ ॥
संप्रक्षालनकालोयं लोकानां समुपस्थितः ।
तस्मात्त्वां बोधयाम्यद्य यत्ते हितमनुत्तमम् ॥ २८ ॥
त्रसानां स्थावराणां च यच्चेङ्गं यच्च नेङ्गति ।
तस्य सर्वस्य संप्राप्तः कालः परमदारुणः ॥ २९ ॥
नौश्च कारयितव्या ते दृढा प्राप्तवटारका ।
तत्र सप्तर्षिभिः सार्धमारुहेथा महामुने ॥ ३० ॥
बीजानि चैव सर्वाणि यथोक्तानि द्विजैः पुरा ।
तस्यामारोहयेर्नावि सुसंगुप्तानि भागशः ॥ ३१ ॥

Digitized by Google

नौस्थश्च मां प्रतीक्षेथास्ततो मुनिजनप्रिय ।
आगमिष्याम्यहं शृङ्गी विज्ञेयस्तेन तापस ॥ ३२ ॥
एवमेतत्त्वया कार्यमापृष्टोसि गच्छाम्यहम् ।
ता न शक्या महत्यो वा आपस्तर्तुं मया विना ॥ ३३ ॥
नाभिशङ्क्यमिदं चापि वचनं मे त्वया विभो ।
एवं करिष्य इति तं स मत्स्यं प्रत्यभाषत ॥ ३४ ॥
जग्मतुश्च यथाकाममनुज्ञाप्य परस्परम् ।
ततो मनुर्महाराज यथोक्तं मत्स्यकेन ह ॥ ३५ ।
बीजान्यादाय सर्वाणि सागरं पुप्लुवे तदा ।
नौकया शुभया धीरो महोर्मिणमरिन्दम ॥ ३६ ॥
चिन्तयामास स मनुस्तं मत्स्यं पृथिवीपते ।
स च तच्चिन्तितं ज्ञात्वा मत्स्यः परपुरंजय ।
शृङ्गी तत्र जगामाशु तदा भरतसत्तम ॥ ३७ ॥
तं दृष्ट्वा मनुजव्याघ्र मनुर्मत्स्यं जलार्णवे ।
शृङ्गिणं तं यथोक्तेन रूपेणाद्रिमिवोच्छ्रितम् ॥ ३८ ॥
वटारकमयं पाशमथ मत्स्यस्य मूर्धनि ।
मनुर्मनुजशार्दूल तस्मिञ्शृङ्गे न्यवेशयत् ॥ ३९ ॥
संयतस्तेन पाशेन मत्स्यः परपुरंजय ।
वेगेन महता नावं प्राकर्षल्लवणाम्भसि ॥ ४० ॥
स ततार तया नावा समुद्रं मनुजेश्वरः ।
नृत्यमानमिवोर्मिभिर्गर्जमानमिवाम्भसा ॥ ४१ ॥
क्षोभ्यमाना महावातैः सा नौस्तस्मिन्महोदधौ ।
घूर्णते चपलेव स्त्री मत्ता परपुरंजय ॥ ४२ ॥

Digitized by Google

नैव भूमिर्न च दिशः प्रदिशो वा प्रकाशिरे ।
सर्वमाम्भसमेवासीत्खं द्यौश्च नरपुंगव ॥ ४३ ॥
एवं भूते तदा लोके सकले भरतर्षभ ।
अदृश्यन्तर्षयः सप्त मनुर्मत्स्यस्तथैव ह ॥ ४४ ॥
एवं बहून्वर्षगणांस्तां नावं सोथ मत्स्यकः ।
चकर्षातन्द्रितो राजंस्तस्मिन्सलिलसंचये ॥ ४५ ॥
ततो हिमवतः शृङ्गं यत्परं भरतर्षभ ।
तत्राकर्षत्ततो नावं स मत्स्यः कुरुनन्दन ॥ ४६ ॥
अथाब्रवीत्तदा मत्स्यस्तानृषीन्प्रहसञ्शनैः ।
अस्मिन्हिमवतः शृङ्गे नावं बध्नीत माचिरम् ॥ ४७ ॥
सा बद्धा तत्र तैस्तूर्णमृषिभिर्भरतर्षभ ।
नौर्मत्स्यस्य वचः श्रुत्वा शृङ्गे हिमवतस्तदा ॥ ४८ ॥
तच्च नौबन्धनं नाम शृङ्गं हिमवतः परम् ।
ख्यातमद्यापि कौन्तेय तद्विद्धि भरतर्षभ ॥ ४९ ॥
अथाब्रवीदनिमिषस्तानृषीन्स हितस्तदा ।
अहं प्रजापतिर्ब्रह्मा मत्परं नाधिगम्यते ॥ ५० ॥
मत्स्यरूपेण यूयं च मयास्मान्मोक्षिता भयात् ।
मनुना च प्रजाः सर्वाः सदेवासुरमानुषाः ॥ ५१ ॥
स्रष्टव्याः सर्वलोकाश्च पञ्चेङ्गं पञ्च नेङ्गति ।
तपसा चातितीव्रेण प्रतिभाप्यं भविष्यति ॥ ५२ ॥
मत्प्रसादात्प्रजासर्गे न च मोहं गमिष्यति ।
इत्युक्त्वा वचनं मत्स्यः क्षणेनादर्शनं गतः ॥ ५३ ॥

स्रष्टुकामः प्रजाश्चापि मनुर्वैवस्वतः स्वयम् ।
प्रमूढोभूत्प्रजासर्गे तपस्तेपे महत्ततः ॥ ५४ ॥
तपसा महता युक्तः सोथ स्रष्टुं प्रचक्रमे ।
सर्वाः प्रजा मनुः साक्षाद्यथावद्भरतर्षभ ॥ ५५ ॥
इत्येतं मात्स्यकं नाम पुराणं परिकीर्तितम् ।
आख्यानमिदमाख्यातं सर्वपापहरं मया ॥ ५६ ॥
य इदं शृणुयान्नित्यं मनोश्चरितमादितः ।
स सुखी सर्वपूर्णार्थः स्वर्गलोकमियान्नरः ॥ ५७ ॥

॥ इत्यारण्यके पर्वणि मत्स्योपाख्यानं समाप्तम् ॥ ० ॥

Digitized by Google

## ॥ सावित्र्युपाख्यानम् ॥

॥ मार्कण्डेय उवाच ॥

शृणु राजन्वरस्त्रीणां महाभाग्यं युधिष्ठिर ।
सर्वमेव यथा प्राप्तं सावित्र्या राजकन्यया ॥ १ ॥
आसीन्मद्रेषु धर्मात्मा राजा परमधार्मिकः ।
ब्रह्मण्यश्च शरण्यश्च सत्यसन्धो जितेन्द्रियः ॥ २ ॥
यज्वा दानपतिर्दक्षः पौरजानपदप्रियः ।
पार्थिवोश्वपतिर्नाम सर्वभूतहिते रतः ॥ ३ ॥
क्षमावाननपत्यश्च सत्यवान्संयतेन्द्रियः ।
अतिक्रान्तेन वयसा संतापमुपजग्मिवान् ॥ ४ ॥
अपत्योत्पादनार्थं च तीव्रं नियममास्थितः ।
काले परिमिताहारो ब्रह्मचारी जितेन्द्रियः ॥ ५ ॥
हुत्वा शतसहस्रशः सावित्र्या राजसत्तमः ।
षष्ठे षष्ठे तदा काले बभूव मितभोजनः ॥ ६ ॥
एतेन नियमेनासीद्वर्षाणि दश चाष्ट च ।
पूर्णे त्वष्टादशे वर्षे सावित्री तुष्टिमभ्यगात् ॥ ७ ॥
रूपिणी तु तदा राजन्दर्शयामास तं नृपम् ।
अग्निहोत्रात्समुत्थाय हर्षेण महतान्विता ।
उवाच चैनं वरदा वचनं पार्थिवं तदा ॥ ८ ॥
ब्रह्मचर्येण शुद्धेन नियमेन दमेन च ।
सर्वात्मना च भक्त्या च तुष्टास्मि तव पार्थिव ॥ ९ ॥

Digitized by Google

वरं वृणीष्वाश्वपते मद्रराज यथेप्सितम् ।
न प्रमादश्च धर्मेषु कर्तव्यस्ते कथंचन ॥ १० ॥

॥ अश्वपतिरुवाच ॥

अपत्यार्थं समारम्भः कृतो धर्मेप्सया मया ।
पुत्रा मे बहवो देवि भवेयुः कुलभावनाः ॥ ११ ॥
तुष्टासि यदि मे देवि काममेतं वृणोम्यहम् ।
सन्तानो हि परो धर्म इत्याहुर्मां द्विजातयः ॥ १२ ॥

॥ सावित्र्युवाच ॥

पूर्वमेव मया राजन्नभिप्रायमिमं तव ।
ज्ञात्वा पुत्रार्थमुक्तो वै तव हेतोः पितामहः ॥ १३ ॥
प्रसादाच्चैव तस्मात्ते स्वयंभूविहिताऽनृप ।
कन्या तेजस्विनी सौम्या क्षिप्रमेव भविष्यति ॥ १४॥
उत्तरं च न ते किंचिद्व्याहर्तव्यं कथंचन ।
पितामहनिसर्गेण तुष्टा ह्येतद्ब्रवीमि ते ॥ १५ ॥

॥ मार्कण्डेय उवाच ॥

स तथेति प्रतिज्ञाय सावित्र्या वचनं नृपः ।
प्रसादयामास पुनः क्षिप्रमेतद्भवत्विति ॥ १६ ॥
अन्तर्हितायां सावित्र्यां जगाम स्वगृहं पुनः ।
स्वराज्ये चावसत्प्रीतः प्रजा धर्मेण पालयन् ॥ १७ ॥
कस्मिंश्चित्तु गते काले स राजा नियतव्रतः ।
ज्येष्ठायां धर्मचारिण्यां महिष्यां गर्भमादधे ॥ १८ ॥
राजपुत्र्यां तु गर्भः स मालव्यां भरतर्षभ ।
व्यवर्धत यथा शुक्ले तारापतिरिवाम्बरे ॥ १९ ॥

Digitized by Google

प्राप्ते काले तु सुषुवे कन्यां राजीवलोचनाम् ।
क्रियाश्च तस्या मुदितश्चक्रे स नृपतिस्तदा ॥ २० ॥
सावित्र्या प्रीतया दत्ता सावित्र्या हुतया ह्यपि ।
सावित्रीत्येव नामास्याश्चक्रुर्विप्रास्तथा पिता ॥ २१ ॥
सा विग्रहवतीव श्रीर्व्यवर्धत नृपात्मजा ।
कालेन चापि सा कन्या यौवनस्था बभूव ह ॥ २२ ॥
तनुमध्यां पृथुश्रोणीं प्रतिमां काञ्चनीमिव ।
प्राप्तेयं देवकन्येति दृष्ट्वा सम्मेनिरे जनाः ॥ २३ ॥
तां तु पद्मपलाशाक्षीं ज्वलन्तीमिव तेजसा ।
न कश्चिद्वरयामास तेजसा प्रतिबाधितः ॥ २४ ॥
अथाप्येषा शिरःस्नाता देवतामभिगम्य सा ।
हुत्वाग्निं विधिवद्विप्रान्वाचयामास पर्वणि ॥ २५ ॥
ततः सुमनसः शेषाः प्रतिगृह्य महात्मनः ।
पितुः समीपमगमद्देवी श्रीरिव रूपिणी ॥ २६ ॥
साभिवाद्य पितुः पादौ शेषाः पूर्वं निवेद्य च ।
कृताञ्जलिर्वरारोहा नृपतेः पार्श्वमास्थिता ॥ २७ ॥
यौवनस्थां तु तां दृष्ट्वा स्वां सुतां देवरूपिणीम् ।
अयाच्यमानां च वरैर्नृपतिर्दुःखितोभवत् ॥ २८ ॥

॥ राजोवाच ॥

पुत्रि प्रदानकालस्ते न च कश्चिद्वृणोति त्वाम् ।
स्वयमन्विच्छ भर्तारं गुणैः सदृशमात्मनः ॥ २९ ॥
प्रार्थितः पुरुषो यश्च स निवेद्यस्त्वया मम ।
विमृश्याहं प्रदास्यामि वरय त्वं यथेप्सितम् ॥ ३० ॥
श्रुतं हि धर्मशास्त्रेषु पठ्यमानं द्विजातिभिः ।



Digitized by Google

तथा त्वमपि कल्याणि गदतो मे वचः शृणु ॥ ३१ ॥
अप्रदाता पिता वाच्यो वाच्यश्चानुपयन्पतिः ।
मृते भर्तरि पुत्रश्च वाच्यो मातुररक्षिता ॥ ३२ ॥
इदं मे वचनं श्रुत्वा भर्तुरन्वेषणे त्वर ।
देवतानां यथा वाच्यो न भवेयं तथा कुरु ॥ ३३ ॥

॥ मार्कण्डेय उवाच ॥

एवमुक्त्वा दुहितरं तथा वृद्धांश्च मन्त्रिणः ।
व्यादिदेशानुयात्रं च गम्यतां चेत्यचोदयत् ॥ ३४ ॥
साभिवाद्य पितुः पादौ व्रीडितेव तपस्विनी ।
पितुर्वचनमाज्ञाय निर्जगामाविचारितम् ॥ ३५ ॥
सा हैमं रथमास्थाय स्थविरैः सचिवैर्वृता ।
तपोवनानि रम्याणि राजर्षीणां जगाम ह ॥ ३६ ॥
मान्यानां तत्र वृद्धानां कृत्वा पादाभिवादनम् ।
वनानि क्रमशस्तानि सर्वाण्येवाभ्यगच्छत ॥ ३७ ॥
एवं तीर्थेषु सर्वेषु धनोत्सर्गं नृपात्मजा ।
कुर्वती द्विजमुख्यानां तं तं देशं जगाम ह ॥ ३८ ॥

इति महाभारते सावित्र्युपाख्याने प्रथमः सर्गः ॥ १ ॥

---

॥ मार्कण्डेय उवाच ॥

अथ मद्राधिपो राजा नारदेन समागतः ।
उपविष्टः सभामध्ये कथायोगेन भारत ॥ १ ॥

Digitized by Google

ततोभिगम्य तीर्थानि सर्वाण्येवाश्रमांस्तथा ।
आजगाम पुनर्वेश्म सावित्री सह मन्त्रिभिः ॥ २ ॥
नारदेन समासीनं दृष्ट्वा सा पितरं शुभा ।
उभयोरेव शिरसा चक्रे पादाभिवन्दनम् ॥ ३ ॥

॥ नारद उवाच ॥

क्व गताभूत्सुतेयं ते कुतश्चैवागता नृप ।
किमर्थं युवतीं भर्त्रा न चेमां संप्रयच्छति ॥ ४ ॥

॥ अश्वपतिरुवाच ॥

कार्येण खल्वनेनैव प्रेषिताद्यैव चागता ।
तदस्याः शृणु देवर्षे भर्ता वै योनया वृतः ॥ ५ ॥
सा ब्रूहि विस्तरेणेति पित्रा संचोदिता शुभा ।
तदेतस्यैव वचनं प्रतिगृह्येदमब्रवीत् ॥ ६ ॥
आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातः पश्चादन्धो बभूव ह ॥ ७ ॥
विनष्टचक्षुषस्तस्य बालपुत्रस्य धीमतः ।
सामीप्येन हृतं राज्यं छिद्रेस्मिन्पूर्ववैरिणा ॥ ८ ॥
स बालवत्सया सार्धं भार्यया प्रस्थितो वनम् ।
महारण्यं गतश्चापि तपस्तेपे महाव्रतः ॥ ९ ॥
तस्य पुत्रः पुरे जातः संवृद्धश्च तपोवने ।
सत्यवाननुरूपो वै भर्तेति मनसा वृतः ॥ १० ॥

॥ नारद उवाच ॥

अहो बत महत्पापं सावित्र्या नृपते कृतम् ।

Digitized by Google

अजानन्त्या यदनया गुणवान्सत्यवान्वृतः ॥ ११ ॥
सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ।
ततोस्य ब्राह्मणाश्चक्रुर्नामैतत्सत्यवानिति ॥ १२ ॥
बालस्याश्वाः प्रियाश्चास्य करोत्यश्वांश्च मृन्मयान् ।
चित्रेपि चालिखत्यश्वांश्चित्राश्व इति चोच्यते ॥ १३ ॥

॥ राजोवाच ॥

अपीदानीं स तेजस्वी बुद्धिमान्स नृपात्मजः ।
क्षमावानपि वा शूरः सत्यवान्पितृवत्सलः ॥ १४ ॥

॥ नारद उवाच ॥

विवस्वानिव तेजस्वी बृहस्पतिसमो मती ।
महेन्द्र इव शूरश्च वसुधेव क्षमान्वितः ॥ १५ ॥

॥ अश्वपतिरुवाच ॥

अपि राजात्मजो दाता ब्रह्मण्यश्चापि सत्यवान् ।
रूपवानप्युदारो वा अथवा प्रियदर्शनः ॥ १६ ॥

॥ नारद उवाच ॥

सांकृते रतिदेवस्य स्वशक्त्या दानतः समः ।
ब्रह्मण्यः सत्यवादी च शिविरौशीनरो यथा ॥ १७ ॥
ययातिरिव चोदारः सोमवत्प्रियदर्शनः
रूपेणाप्रतिमोश्विभ्यां द्युमत्सेनसुतो बली ॥ १८ ॥
स दान्तः स मृदुः शूरः स सत्यः संयतेन्द्रियः

Digitized by Google

स मैत्रः सोनसूयश्च धृतिमान्द्युतिमांश्च सः ॥ १९ ॥
नित्यशश्चार्जवं तस्मिन्स्थितिस्तस्यैव च ध्रुवा ।
संक्षेपतस्तपोवृद्धैः शीलवृद्धैश्च कथ्यते ॥ २० ॥

॥ अश्वपतिरुवाच ॥

गुणैरुपेतं सर्वैस्तं भगवन्प्रब्रवीषि मे ।
दोषानप्यस्य मे ब्रूहि यदि सन्तीह केचन ॥ २१ ॥

॥ नारद उवाच ॥

एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति ।
स च दोषो प्रयत्नेन न शक्यमतिवर्तितुम् ॥ २२ ॥
एको दोषोस्य नान्योस्ति सोद्यप्रभृति सत्यवान् ।
संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति ॥ २३ ॥

॥ राजोवाच ॥

एहि सावित्रि गच्छ त्वमन्यं वरय शोभने ।
तस्य दोषो महानेको गुणानाक्रम्य तिष्ठति ॥ २४ ॥
यथा मां भगवानाह नारदो देवसत्कृतः ।
संवत्सरेण सोल्पायुर्देहन्यासं करिष्यति ॥ २५ ॥

॥ सावित्र्युवाच ॥

सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सताम् ॥ २६ ॥
दीर्घायुरथ वाल्पायुः सगुणो निर्गुणोपि वा ।
सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥ २७ ॥

Digitized by Google

मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।
कर्मणा क्रियते पश्चात्प्रमाणं मे मनस्ततः ॥ २८ ॥

॥ नारद उवाच ॥

स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव ।
नेषा वारयितुं शक्या धर्मादस्मात्कथंचन । २९ ॥
नान्यस्मिन्पुरुषे सन्ति ये सत्यवति वै गुणाः ।
प्रदानमेव तस्मान्मे रोचते दुहितुस्तव ॥ ३० ॥

॥ राजोवाच ॥

अविचाल्यमेतदुक्तं तथ्यं भगवता वचः ।
करिष्यामि तदेवं वै गुरुर्हि भगवान्मम ॥ ३१ ॥

॥ नारद उवाच ॥

अविघ्नमस्तु सावित्र्याः प्रदानं दुहितुस्तव ।
साधयिष्याम्यहं तावत्सर्वेषां भद्रमस्तु वः ॥ ३२ ॥

॥ मार्कण्डेय उवाच ॥

एवमुक्त्वा समुत्पत्य नारदस्त्रिदिवं गतः ।
राजापि दुहितुः सर्वं वैवाहिकमकारयत् ॥ ३३ ॥
॥ इति महाभारते सावित्र्युपाख्याने द्वितीयः सर्गः ॥ २ ॥

---

॥ मार्कण्डेय उवाच ॥

अथ कन्याप्रदानाय वैवाहिकमचिन्तयत् ।
समानिन्ये च तत्सर्वं भाण्डं वैवाहिकं नृपः ॥ १ ॥

Digitized by Google

ततो वृद्धान्द्विजान्सर्वानृत्विजः सपुरोहितान् ।
समाहृत्य तिथौ पुण्ये प्रययौ सह कन्यया ॥ २ ॥
मेध्यारण्यं स गत्वा च द्युमत्सेनाश्रमं नृपः ।
पद्भ्यामेव द्विजैः सार्धं राजर्षिस्तमुपागमत् ॥ ३ ॥
तत्रापश्यन्महात्मानं सालवृक्षमुपाश्रितम् ।
कौश्यां वृष्यां समासीनं चक्षुर्हीनं नृपं तदा ॥ ४ ॥
स राजा तस्य राजर्षेः कृत्वा पूजां यथाविधि ।
वाचा सुनियतो भूत्वा चकारात्मनिवेदनं ॥ ५ ॥
तस्यार्घमासनं चैव गां चावेद्य स धर्मवित् ।
किमागमनमित्येव राजा राजानमब्रवीत् ॥ ६ ॥
तस्य सर्वमभिप्रायमितिकर्तव्यतां च ताम् ।
सत्यवन्तं समुद्दिश्य सर्वमेव न्यवेदयत् ॥ ७ ॥

॥ अश्वपतिरुवाच ॥

सावित्री मम राजर्षे कन्येयं मम शोभना ।
तां स्वधर्मेण धर्मज्ञ स्नुषार्थं त्वं गृहाण मे ॥ ८ ॥

॥ द्युमत्सेन उवाच ॥

च्युताः स्म राज्याद्वनवासमाश्रिताश्चराम धर्मं नियतास्तपस्विनः ।
कथं त्वियं भवनवासमाश्रमे सहिष्यते क्लेशमिमं सुता तव ॥ ९ ॥

॥ अश्वपतिरुवाच ॥

सुखं दुःखं च भवाभवात्मकं सदा विजानाति सुताहमेव च ।

Digitized by Google

न मद्विधे युज्यति वाक्यमीदृशं विनिश्चयेनाभिगतोस्मि ते नृप ॥१०॥
आशां नार्हसि मे हन्तुं सौहृदात्प्रणतस्य च ।
अभितश्चागतं प्रेम्णा प्रत्याख्यातुं न मार्हसि ॥ ११ ॥
अनुरूपो हि युक्तश्च त्वं ममाहं तवापि च ।
स्नुषां प्रतीच्छ मे कन्यां भार्यां सत्यवतः सतः ॥ १२ ॥

॥ द्युमत्सेन उवाच ॥

पूर्वमेवाभिलषितः संबन्धो मे त्वया सह ।
भ्रष्टराजस्त्वहमिति तत एतद्विचारितम् ॥ १३ ॥
अभिप्रायस्त्वयं यो मे पूर्वमेवाभिकाङ्क्षितः ।
स निवृत्तस्त्वयाद्यैव काङ्क्षितोह्यसि मेतिथिः ॥ १४ ॥

॥ मार्कण्डेय उवाच ॥

ततः सर्वान्समानीय द्विजानाश्रमवासिनः ।
यथाविधि समुद्वाहं कारयामासतुर्नृपौ ॥ १५ ॥
दत्त्वा सोश्वपतिः कन्यां यथार्हं च परिच्छदम् ।
ययौ स्वमेव भवनं युक्तः परमया मुदा ॥ १६ ॥
सत्यवानपि तां भार्यां लब्ध्वा सर्वगुणान्विताम् ।
मुमुदे सापि तं लब्ध्वा भर्तारं मनसेप्सितम् ॥ १७ ॥
गते पितरि सर्वाणि संन्यस्याभरणानि सा ।
जगृहे वल्कलान्येव वस्त्रं काषायमेव च । १८
परिचारैर्गुणैश्चैव प्रश्रयेण दमेन च ।
सर्वकामक्रियाभिश्च सर्वेषां तुष्टिमावहत् ॥ १९ ॥
श्वश्रूं शरीरसत्कारैः सर्वैराच्छादनादिभिः ।

Digitized by Google

श्वशुरं देवसत्कारैर्वाचः संयमनेन च ॥ २० ॥
तथैव प्रियवादेन नैपुण्येन शमेन च ।
रहश्चैवोपचारेण भर्तारं पर्यतोषयत् ॥ २१ ॥
एवं तत्राश्रमे तेषां सदा निवसतां सताम् ।
कालस्तपस्यतां कश्चिदतिचक्राम भारत ॥ २२ ॥
सावित्र्या ग्लायमानायास्तिष्ठन्त्याश्च दिवानिशम् ।
नारदेन यदुक्तं तद्वाक्यं मनसि वर्तते ॥ २३ ॥

॥ इति महाभारते सावित्र्युपाख्याने तृतीयः सर्गः ॥ ३ ॥

---

॥ मार्कण्डेय उवाच ॥

ततः काले बहुतिथे व्यतिक्रान्ते कदाचन ।
प्राप्तः स कालो मर्तव्यं यत्र सत्यवता नृप ॥ १ ॥
गणयन्त्याश्च सावित्र्या दिवसे दिवसे गते ।
तद्वाक्यं नारदेनोक्तं वर्तते हृदि नित्यशः ॥ २ ॥
चतुर्थेऽहनि मर्तव्यमिति संचिन्त्य भाविनी ।
व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं स्थिताभवत् ॥ ३ ॥
तं श्रुत्वा नियमं तस्या भृशं दुःखान्वितो नृपः ।
उत्थाय सावित्रीं वाक्यमब्रवीत्परिसान्त्वयन् ॥ ४ ॥
अतितीव्रोयमारम्भस्त्वयारब्धो नृपात्मजे ।
तिसृणां वसतीनां हि स्थानं परमदुश्चरम् ॥ ५ ॥

॥ सावित्र्युवाच ॥

न कार्यस्तात संतापः पारयिष्याम्यहं तपः ।
व्यवसायकृतं होदं व्यवसायश्च कारणम् ॥ ६ ॥



Digitized by Google

॥ द्युमत्सेन उवाच ॥

व्रतं भिन्द्धीति वक्तुं त्वां नास्मि शक्तः कथंचन ।
पारयस्वेति वचनं युक्तमस्मद्विधो वदेत् ॥ ७ ॥

॥ मार्कण्डेय उवाच ॥

एवमुक्त्वा द्युमत्सेनो विरराम महामनाः ॥
तिष्ठन्ती चापि सावित्री काष्ठभूतेव लक्ष्यते ॥ ८ ॥
श्वो भूते भर्तृमरणे सावित्र्या भरतर्षभ ।
दुःखान्वितायास्तिष्ठन्त्याः सा रात्रिर्व्यत्यवर्तत ॥ ९ ॥
अद्य तद्दिवसं चेति हुत्वा शीघ्रं हुताशनम् ।
युगमात्रोदिते सूर्ये कृत्वा पौर्वाह्णिकीः क्रियाः ॥ १० ॥
ततः सर्वान्द्विजान्वृद्धाञ्श्वश्रूं श्वशुरमेव च ।
अभिवाद्यानुपूर्वेण प्राञ्जलिर्नियता स्थिता ॥ ११ ॥
अवैधव्याशिषस्ते तु सावित्र्यर्थं हिताः शुभाः ।
ऊचुस्तपस्विनः सर्वे तपोवननिवासिनः ॥ १२ ॥
एवमस्त्विति सावित्री ध्यानयोगपरायणा ।
मनसा ता गिरः सर्वाः प्रत्यगृह्णात्तपस्विनाम् ॥ १३ ॥
तं कालं तं मुहूर्तं च प्रतीक्षन्ती नृपात्मजा ।
यथोक्तं नारदवचश्चिन्तयन्ती सुदुःखिता ॥ १४ ॥
ततस्तु श्वश्रूश्वशुरावूचतुस्तां नृपात्मजाम् ।
एकान्तस्थामिदं वाक्यं प्रीत्या भरतसत्तम ॥ १५ ॥
व्रतं यथोपदिष्टं वै यथावत्पारितं त्वया ।
आहारकालः संप्राप्तः क्रियतां यदनन्तरम् ॥ १६ ॥

॥ सावित्र्युवाच ॥

अस्तंगते मयादित्ये भोक्तव्यं कृतकाम्यया ।
एष मे हृदि संकल्पः समयश्च कृतो मया ॥ १७ ॥

Digitized by Google

॥ मार्कण्डेय उवाच ॥

एवं संभाषमाणायां सावित्र्यां भोजनं प्रति ॥
स्कन्धे परशुमादाय सत्यवान्प्रस्थितो वनम् ॥ १८ ॥
सावित्री आह भर्तारं नैकस्त्वं गन्तुमर्हसि ।
सह त्वया गमिष्यामि न हि त्वां हातुमुत्सहे ॥ १९ ॥

॥ सत्यवानुवाच ॥

वनं न गतपूर्वं ते दुःखपंन्था भविष्यति ।
व्रतोपवासाक्षमा च कथं पद्भ्यां गमिष्यसि ॥ २० ॥

॥ सावित्र्युवाच ॥

उपवासान्न मे ग्लानिर्नास्ति चापि परिश्रमः ।
गमने च कृतोत्साहां प्रतिषेद्धुं न मार्हसि ॥ १ ॥

॥ सत्यवानुवाच ॥

यदि ते गमनोत्साहः करिष्यामि तव प्रियम् ।
मम त्वामन्त्रय गुरू न मां दोषः स्पृशेदयम् ॥ २२ ॥

॥ मार्कण्डेय उवाच ॥

साभिवाद्याब्रवीच्छ्वश्रूं श्वशुरं च महाव्रता ।
अयं गच्छति भर्ता मे फलाहारो महावनम् ॥ २३ ॥
इच्छेयमप्यनुज्ञाता आर्यया श्वशुरेण च ।
अनेन सह निर्गन्तुं न हि मे विरहक्षमः ॥ २४ ॥
गुर्वग्निहोत्रार्थकृते प्रस्थितश्च सुतस्तव ।
न निवार्यो निवार्यः स्यादन्यथा प्रस्थितो वनम् ॥ ५ ॥

Digitized by Google

संवत्सरः किंचिदूनो न निष्क्रान्ताहमाश्रमात् ।
वनं कुसुमितं द्रष्टुं परं कौतूहलं हि मे ॥ २६ ॥

॥ द्युमत्सेन उवाच ॥

यतः प्रभृति सावित्री पित्रा दत्ता स्नुषा मम ।
नानयाभ्यर्थनायुक्तमुक्तं पूर्वं स्मराम्यहम् ॥ २७ ॥
तदेषा लभतां कामं यथाभिलषितं वधूः ।
अप्रमादश्च कर्तव्यः पुत्रि सत्यवता पथि ॥ २८ ॥

॥ मार्कण्डेय उवाच ॥ ॥

उभाभ्यामभ्यनुज्ञाता सा जगाम यशस्विनी ।
सह भर्त्रा हसन्तीव हृदयेन विधूयता ॥ २९ ॥
सा वनानि विचित्राणि रमणीयानि सर्वशः ।
मयूरगणजुष्टानि ददर्श विपुलेक्षणा ॥ ३० ॥
नदीः पुण्यवहाश्चैव पुष्पितांश्च नगोत्तमान् ।
सत्यवानाह पश्येति सावित्रीं मधुरं वचः ॥ ३१ ॥
निरीक्षमाणा भर्तारं सर्वावस्थमनिन्दिता ।
मृतमेव हि तं मेने काले मुनिवचः स्मरन् ॥ ३२ ॥
अनुवर्तन्ती भर्तारं जगाम मृदुगामिनी ।
द्विधेव हृदयं कृत्वा तं च कालमवेक्षती ॥ ३३ ॥

॥ इति महाभारते सावित्र्युपाख्याने चतुर्थः सर्गः ॥ ४ ॥

---

॥ मार्कण्डेय उवाच ॥

अथ भार्यासहायः स फलान्यादाय वीर्यवान् ।
कठिनं पूरयामास ततः काष्ठान्यपाटयत् ॥ १ ॥

Digitized by Google

तस्य पाटयतः काष्ठं स्वेदो वै समजायत ।
व्यायामेन च तेन स्म जज्ञे शिरसि वेदना ॥ २ ॥
सोभिगम्य प्रियां भार्यामुवाच श्रमपीडितः ।
अङ्गानि चैव सावित्रि हृदयं दह्यतीव च ॥ ३ ॥
अस्वस्थमिव चात्मानं लक्षये मितभाषिणि ।
तत्स्वप्तुमिच्छे कल्याणि न स्थातुं शक्तिरस्ति मे ॥ ४ ॥
सा समासाद्य सावित्री भर्तारमुपगम्य च ।
उत्सङ्गेस्य शिरः कृत्वा निषसाद महीतले ॥ ५ ॥
ततः सा नारदवचो विस्मरन्ती तपस्विनी ।
तं मुहूर्तं क्षणं वेलां दिवसं च युयोज ह ॥ ६ ॥
मुहूर्तादेव चापश्यत्पुरुषं रक्तवाससम् ।
बद्धमौलिं वपुष्मन्तमादित्यसमतेजसम् ॥ ७ ॥
श्यामावदातं रक्ताक्षं पाशहस्तं भयावहम् ।
स्थितं सत्यवतः पार्श्वे निरीक्षन्तं तमेव च ॥ ८ ॥
तं दृष्ट्वा सहसोत्थाय भर्तुर्न्यस्य शनैः शिरः ।
कृताञ्जलिरुवाचार्त्ता हृदयेन प्रवेपती ॥ ९ ॥
देव तं त्वाभिजानामि वपुरेतद्धचमानुषम् ।
कामया ब्रूहि मे देव कस्त्वं किं च चिकीर्षसि ॥ १० ॥

॥ यम उवाच ॥

पतिव्रतासि सावित्रि तथैव च तपोन्विता ।
अतस्त्वामभिभाषामि विद्धि मां त्वं शुभं यमम् ॥ ११ ॥
अयं ते सत्यवान्भर्ता क्षीणायुः पार्थिवात्मजः ।
नेष्याम्येनमहं बद्धा विद्धचेतन्मे चिकीर्षितम् ॥ १२ ॥

Digitized by Google

॥ सावित्र्युवाच ॥

श्रूयते भगवन्दूतास्तव गच्छन्ति मानवान् ।
नेतुं किल भवान्कस्मादागतोसि स्वयं प्रभो ॥ १३ ॥

॥ मार्कण्डेय उवाच ॥

इत्युक्तः पितृराजस्तां भगवान्संचिकीर्षितम् ।
यथावत्सर्वमाख्यातुं तत्प्रियार्थं प्रचक्रमे ॥ १४ ॥
अयं हि धर्मसंयुक्तो रूपवान्गुणसागरः ।
नार्हो मत्पुरुषैर्नेतुमतोस्मि स्वयमागतः ॥ १५ ॥
ततः सत्यवतः कायात्पाशबद्धं वशं गतम् ।
अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् ॥ १६ ॥
ततः समुद्भूतप्राणं गतश्वासं हतप्रभम् ।
निर्विचेष्टं शरीरं तद्बभूवाप्रियदर्शनम् ।
यमस्तु तं तथा बद्ध्वा प्रयातो दक्षिणामुखः ॥ १७ ॥
सावित्री चापि दुःखार्त्ता यममेवान्वगच्छत ।
नियमव्रतसंपन्ना महाभागा पतिव्रता ॥ १८ ॥

॥ यम उवाच ॥

निवर्त गच्छ सावित्रि कुरुष्वास्यौर्ध्वदेहिकम् ।
कृतं भर्तुस्त्वयानृण्यं यावद्भर्म्यं गतं त्वया ॥ १९ ॥

॥ सावित्र्युवाच ॥

यत्र मे नीयते भर्ता स्वयं वा यत्र गच्छति ।
मयापि तत्र गन्तव्यमेष धर्मः सनातनः ॥ २० ॥

Digitized by Google

तपसा गुरुभक्त्या च भर्तृस्नेहाद्व्रतेन च ।
तव चैव प्रसादेन न मे प्रतिहता गतिः ॥ २१ ॥
प्राहुः साप्तपदं मैत्रं बुद्धास्तत्त्वार्थदर्शिनः ।
मित्रतां च पुरस्कृत्य किंचिद्वक्ष्यामि तच्छृणु ॥ २२ ॥
नानात्मवन्तो हि वने चरन्ति धर्मं च सत्यं च प्रतिश्रयं च ।
विज्ञानतो धर्ममुदाहरन्ति तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥ २३ ॥
एकस्य धर्मेण सतां मतेन सर्वे स्म तन्मार्गमनुप्रपन्नाः ।
मा द्वितीयं मा तृतीयं च वाञ्छे तस्मात्सन्तो धर्ममाहुः प्रधानम् ॥ २४ ॥

॥ यम उवाच ॥

निवर्त तुष्टोस्मि तवानया गिरा स्वराक्षरव्यञ्जनहेतुयुक्तया ।
वरं वृणीष्वेह विनास्य जीवितं ददानीति सर्वमनिन्दिते वरम् ॥ २५ ॥

॥ सावित्र्युवाच ॥

च्युतः स्वराज्याद्वनवासमाश्रितो विनष्टचक्षुः श्वशुरो ममाश्रमे ।
स लब्धचक्षुर्बलवान्भवेन्नृपस्तव प्रसादाज्ज्वलनार्कसंनिभः ॥ २६ ॥

॥ यम उवाच ॥

ददानि ते सर्वमनिन्दिते वरं यथा त्वयोक्तं भविता च तत्तथा ।
तवाध्वनि ग्लानिमिवोपलक्षये निवर्त गच्छस्व न ते श्रमो
भवेत् ॥ २७ ॥

॥ सावित्र्युवाच ॥

कुतः श्रमो भर्तृसमीपतोद्य मे यतो हि भर्ता मम सा गतिर्ध्रुवा ।
यतः पतिं नेष्यसि तत्र मे गतिः सुरेश भूयश्च वचो निबोध मे ॥ २८ ॥

Digitized by Google

सतां सकृत्संगतमीप्सितं परं ततः परं मित्रमिति प्रचक्षते ।
न चाफलं सत्पुरुषेण संगतं ततः सतां संनिवसेत्समागमे ॥ २९ ॥

॥ यम उवाच ॥

मनोनुकूलं बुद्धबुद्धिवर्द्धनं त्वयेदमुक्तं वचनं हिताश्रयम् ।
विना पुनः सत्यवतोस्य जीवितं वरं द्वितीयं वरयस्व भाविनि ॥३०॥

॥ सावित्र्युवाच ॥

हृतं पुरा मे श्वशुरस्य धीमतः स्वमेव राज्यं लभतां स पार्थिवः ॥
न च स्वधर्मं प्रजहातु मे गुरुर्द्वितीयमेतद्वरयामि ते वरम् ॥ ३१ ॥

यम उवाच.

स्वमेव राज्यं प्रतिपत्स्यतेचिरान्न च स्वधर्मात्परिहास्यते नृपः ।
कृतेन कामेन मया नृपात्मजे निवर्त गच्छस्व न ते श्रमो भवेत् ॥३२॥

॥ सावित्र्युवाच ॥

प्रजास्त्वयैता नियमेन संयुता नियम्य चैता नयसे न काम्यया ।
अतो यमत्वं तव देव विश्रुतं निबोध चेमां गिरमीरितां मया ॥३३॥
अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च दानं च सतां धर्मः सनातनः ॥ ३४ ॥
एवंप्रायश्च लोकोयं मनुष्याः शक्तिपेशलाः ।
सन्तस्त्वेवाप्यमित्रेषु दयां प्राप्तेषु कुर्वते ॥ ३५॥

॥ यम उवाच ॥

पिपासितस्येव भवेद्यथा पयस्तथा त्वया वाक्यमिदं समीरितं ।
विना पुनः सत्यवतोस्य जीवितं वरं वृणीष्वेह शुभे यदिच्छसि ॥३६॥

Digitized by Google

॥ सावित्र्युवाच ॥

ममानपत्यः पृथिवीपतिः पिता भवेत्पितुः पुत्रशतं तथौरसम् ।
कुलस्य संतानकरं च यद्भवेत्तृतीयमेतं वरयामि ते वरम् ॥ ३७ ॥

॥ यम उवाच ॥

कुलस्य संतानकरं सुवर्चसं शतं सुतानां पितुरस्तु ते शुभे ।
कृतेन कामेन नराधिपात्मजे निवर्त दूरं हि पथस्त्वमागता ॥ ३८ ॥

॥ सावित्र्युवाच ॥

न दूरमेतन्मम भर्तृसंनिधौ मनो हि मे दूरतरं प्रधावति ।
अथ व्रजन्नेव गिरं समुद्यतां ममोच्यमानां शृणु भूय एव ह ॥ ३९ ॥
विवस्वतस्त्वं तनयः प्रतापवांस्ततो हि वैवस्वत उच्यसे बुधैः ।
समेन धर्मेण च रञ्जिताः प्रजास्ततस्त्वमेहेश्वरधर्मराजता ॥ ४० ॥
आत्मन्यपि न विश्वासस्तावान्भवति सत्सु यः
तस्मात्सत्सु विशेषेण सर्वः प्रणयमिच्छति ॥ ४१ ॥
सौहृदात्सर्वभूतानां विश्वासो नाम जायते ।
तस्मात्सत्सु विशेषेण विश्वासं कुरुते जनः ॥ ४२ ॥

॥ यम उवाच ॥

उदाहृतं ते वचनं यदङ्गने शुभे न तादृक्त्वदृते मया श्रुतम् ।
अनेन तुष्टोस्मि विनास्य जीवितं वरं चतुर्थं वरयस्व गच्छ च ॥ ४३ ॥

॥ सावित्र्युवाच ॥

ममात्मजं सत्यवतस्तथौरसं भवेदुभाभ्यामिह यत्कुलोद्वहम् ।
शतं सुतानां बलिनां महात्मनामिमं चतुर्थं वरयामि ते वरम् ॥४४॥



Digitized by Google

॥ यम उवाच ॥

शतं सुतानां बलवीर्यशालिनां भविष्यति प्रीतिकरं तवाबले ।
परिश्रमस्ते न भवेन्नृपात्मजे निवर्त दूरं हि पथस्त्वमागता ॥ ४५ ।

॥ सावित्र्युवाच ॥

सतां सदा शाश्वती धर्मवृत्तिः सन्तो न सीदन्ति न च व्यथन्ते ।
सतां सद्भिर्नाफलः संगमोस्ति सद्भ्यो भयं नानुवर्तन्ति सन्तः ॥४६॥
सन्तो हि सत्येन नयन्ति सूर्यं सन्तो भूमिं तपसा धारयन्ति ।
सन्तो गतिर्भूतभव्यस्य राजन्सतां मध्ये नावसीदन्ति सन्तः ॥ ४७॥
आर्यदृष्टमिदं वृत्तमिति विज्ञाय शाश्वतम् ।
सन्तः परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम् ॥ ४८ ॥
न च प्रसादः पुरुषेषु मोघो न चाप्यर्थः नश्यति नापि मानः ।
यस्मादेतन्नियतं सत्सु नित्यं तस्मात्सन्तो रक्षितारो भवन्ति ॥ ४९ ।

॥ यम उवाच ॥

यथा यथा भाषसि धर्मसंहितं मनोनुकूलं सुपदं महार्थवत् ।
तथा तथा मे त्वयि भक्तिरुत्तमा वरं वृणीष्वाप्रतिमं पतिव्रते ॥५०।

॥ सावित्र्युवाच ॥

न तेपवर्गः सुकृताद्विना कृतस्तथा यथान्येषु वरेषु मानद ।
वरं वृणे जीवतु सत्यवानयं यथा मृता ह्येवमहं विना पतिम् ॥ ५१ ॥
न कामये भर्तृविनाकृता सुखं न कामये भर्तृविनाकृता दिवम् ।
न कामये भर्तृविनाकृता प्रियं न भर्तृहीना व्यवसामि जीवि-
तुम ॥ ५२ ॥

Digitized by Google

वरातिसर्गः शतपुत्रता मम | त्वयैव मे दत्तो ह्रियते पतिः ।
वरं वृणे जीवतु सत्यवानयं तवैव सत्यं वचनं भविष्यति ॥ ५३ ॥
तथेत्युक्त्वा तु तं पाशं मुक्त्वा वैवस्वतो यमः ।
धर्मराजः प्रहृष्टात्मा सावित्रीमिदमब्रवीत् ॥ ५४ ॥
एष भर्ता मया मुक्तो भद्रं ते कुलनन्दिनि ।
अरोगः सर्ववेदेयश्च सिद्धार्थश्च भविष्यति ॥ ५५ ॥
चतुर्वर्षशतं चायुस्त्वया सार्धमवाप्स्यति ।
इष्ट्वा यज्ञैश्च धर्मेण ख्यातिं लोके गमिष्यति ॥ ५६ ॥
त्वयि पुत्रशतं चापि सत्यवाञ्जनयिष्यति ।
ते चापि सर्वे राजानः क्षत्रियाः पुत्रपौत्रिणः ॥ ५७ ॥
ख्यातास्तवनामधेयाश्च भविष्यन्तीह शाश्वतीः ।
पितुश्च ते पुत्रशतं भविता तव मातरि ॥ ५८ ॥
मालव्यां मालवा नाम शाश्वताः पुत्रपौत्रिणः ।
भ्रातरस्ते भविष्यन्ति क्षत्रियास्त्रिदशोपमाः ॥ ५९ ॥
एवं तस्यै वरान्दत्त्वा धर्मराजः प्रतापवान् ।
निवर्तयित्वा सावित्रीं स्वमेव भवनं ययौ ॥ ६० ॥
सावित्र्यपि यमे याते भर्तारं प्रतिलभ्य च ।
जगाम तत्र यत्रास्या भर्तुः शावं कलेवरम् ॥ ६१ ॥
सा भूमौ प्रेक्ष्य भर्तारमभिसृत्योपगृह्य च ।
उत्सङ्गे शिरश्चारोप्य भूमावुपविवेश ह ॥ ६२ ॥
संज्ञां च सत्यवाँल्लब्ध्वा सावित्रीमभ्यभाषत ।
प्रोत्थागत इव प्रेम्णा पुनः पुनरुदीक्ष्य वै ॥ ६३ ॥

Digitized by Google

॥ सत्यवानुवाच ॥

सुचिरं वत सुप्तोस्मि किमर्थं नावबोधितः ।
क्व चासौ पुरुषः श्यामो योसौ मां संचकर्ष ह ॥ ६४ ॥

॥ सावित्र्युवाच ॥

सुचिरं त्वं प्रसुप्तोसि ममाङ्के पुरुषर्षभ ।
गतः स भगवान्देवः प्रजासंयमनो यमः ॥ ६५ ॥
विश्रान्तोसि महाभाग विनिद्रश्च नृपात्मज ।
यदि शक्यं समुत्तिष्ठ विगाढां पश्य शर्वरीम् ॥ ६६ ॥

॥ मार्कण्डेय उवाच ॥

उपलभ्य ततः संज्ञां सुखसुप्त इवोत्थितः ।
दिशः सर्वा वनान्तांश्च निरीक्ष्योवाच सत्यवान् ॥ ६७ ॥
फलाहारोस्मि निष्क्रान्तस्त्वया सह सुमध्यमे ।
ततः पाटयतः काष्ठं शिरसो मे रुजाभवत् ॥ ६८ ॥
शिरोभितापसंतप्तः स्थातुं चिरमशक्नुवन् ।
तवोत्संङ्गे प्रसुप्तोहमिति सर्वं स्मरे शुभे ॥ ६९ ॥
त्वयोपगूढस्य च मे निद्रयापहृतं मनः ।
ततोपश्यं तमो घोरं पुरुषं च महौजसम् ॥ ७० ॥
तद्यदि त्वं विजानासि किं तद्ब्रूहि सुमध्यमे ।
स्वप्ने नु स मया दृष्टो यदि वा सत्यमेव तत् ॥ ७१ ॥
तमुवाचाथ सावित्री रजनी व्यवगाहते ।
श्वस्ते सर्वं यथावृत्तमाख्यास्यामि नृपात्मज ॥ ७२ ॥
उत्तिष्ठोत्तिष्ठ भद्रं ते पितरौ पश्य सुव्रत ।
विगाढा रजनी चेयं निवृत्तश्च दिवाकरः ॥ ७३ ॥

नक्तंचराश्चरन्ते ते हृष्टाः क्रूराभिभाषिणः ।
श्रूयते पर्णशब्दश्च मृगाणां चरतां वने ॥ ७४ ॥
एता घोरान्शिवा नादान्दिशं दक्षिणपश्चिमाम् ।
आस्थाय विरुवन्त्युग्राः कम्पयन्तो मनो मम ॥ ७५ ॥

॥ सत्यवानुवाच ॥

वनं प्रतिभयाकारं घोरेण तमसा वृतम् ।
न विज्ञास्यसि पन्थानं गन्तुं चैव न शक्ष्यसि ॥ ७६ ॥

॥ सावित्र्युवाच ॥

अस्मिन्नद्य वने दग्धे शुष्कवृक्षः स्थितो ज्वलन् ।
वायुना धम्यमानोत्र दृश्यतेग्निः क्वचित्क्वचित् ॥ ७७ ॥
ततोग्निमानयित्वेह ज्वालयिष्यामि पावकम् ।
काष्ठानीमानि सन्तीह जहि संतापमात्मनः ॥ ७८ ॥
यदि नोत्सहसे गन्तुं सरुजं त्वां हि लक्षये ।
न च ज्ञास्यसि पन्थानं तमसा संवृते वने ॥ ७९ ॥
श्वः प्रभाते वने दृश्ये यास्यावोनुमते तव ।
वसावेह क्षपामेतां रुचितं यदि तेनघ ॥ ८० ॥

॥ सत्यवानुवाच ॥

शिरोरुजा निवृत्ता मे स्वस्थान्यङ्गानि लक्षये ।
मातापितृभ्यामिच्छामि संगमं त्वत्प्रसादनात् ॥ ८१ ॥
न कदाचिद्विकाले हि गतपूर्वो मयाश्रमः ।
अनागतायां संध्यायां माता मे संरुणद्धि माम् ॥ ८२ ॥

Digitized by Google

दिवापि मयि निष्क्रान्ते संतप्येते गुरू मम ।
विचिनोति हि मे माता सहैवाश्रमवासिभिः ॥ ८३ ।
मातापित्रा च सुभृशं दुःखिताभ्यामहं पुरा ।
उपालब्धः सुबहुशश्चिरेणागच्छसीति ह ॥ ८४ ॥
का न्ववस्था तयोरद्य मदर्थमिति चिन्तये ।
अदृश्ये मयि ताभ्यां हि महद्दुःखं भविष्यति ॥ ८५ ॥
पुरा मामूचतुश्चैव रात्रावुत्थाय मामकौ ।
भृशं सुदुःखितौ वृद्धौ बहुशः प्रीतिसंयुतौ ॥ ८६ ॥
त्वया हीनौ न जीवेव मुहूर्तमपि पुत्रक ।
यावद्धरिष्यसे पुत्र तावन्नौ जीवितं ध्रुवम् ॥ ८७ ॥
वृद्धयोरन्धयोर्यष्टिस्त्वयि वंशः प्रतिष्ठितः ।
त्वयि पिण्डश्च कीर्तिश्च संतानं चावयोरिति ॥ ८८ ॥
माता वृद्धा पिताप्यन्धस्तयोर्यष्टिरहं किल ।
तौ रात्रौ मामपश्यन्तौ कामवस्थां गमिष्यतः ॥ ८९ ॥
निद्रां चैवाभ्यसूयामि यस्या हेतोः पिता मम ।
माता च संशयं प्राप्ता मत्कृतेनपकारिणी ॥ ९० ॥
अहं च संशयं प्राप्तः कृच्छ्रामापदमास्थितः ।
मातापितृभ्यां रहितो नाहं जीवितुमुत्सहे ॥ ९१ ॥
व्यक्तमाकुलया बुद्ध्या प्रज्ञाचक्षुः पिता मम ।
एकैकमस्यां वेलायां पृच्छत्याश्रमवासिनाम् ॥ ९२ ॥
नात्मानमनुशोचामि यथाहं पितरं शुभे ।
भर्तारं चाप्यनुगतां मातरं परिदुर्बलाम् ॥ ९३ ॥
मत्कृतेन हि तावद्य संतापं परमेष्यतः ।
जीवन्तावनुजीवामि भर्तव्यौ तौ ममेति च ।
तयोः प्रियं मे कर्तव्यमिति जानामि चाप्यहम् ॥ ९४ ॥

Digitized by Google

॥ मार्कण्डेय उवाच ॥

एवमुक्त्वा स धर्मात्मा गुरुभक्तो गुरुप्रियः ।
उच्छ्रित्य बाहू दुःखार्त्तः सुस्वरं प्ररुरोद ह ॥ ९५ ॥
ततोऽब्रवीत्तथा दृष्ट्वा भर्त्तारं शोकपीडितम् ।
विमृज्याश्रूणि नेत्राभ्यां सावित्री धर्मचारिणी ॥ ९६ ॥
यदि मेऽस्ति तपस्तप्तं यदि दत्तं हुतं यदि ।
श्वश्रूश्वशुरभर्तॄणां मम क्षेमास्तु शर्वरी ॥ ९७ ॥
न स्मराम्युक्तपूर्वं वै स्वैरेष्वप्यनृतां गिरम् ।
तेन सत्येन तावद्य ध्रियेतां श्वशुरौ मम ॥ ९८ ॥

॥ सत्यवानुवाच ॥

कामये दर्शनं पित्रोर्याहि सावित्रि माचिरम् ।
पुरा मातुः पितुर्वापि यदि पश्यामि विप्रियम् ।
न जीविष्ये वरारोहे सत्येनात्मानमालभे ॥ ९९ ॥
यदि धर्मे च ते बुद्धिर्मयि च जीवितुमिच्छसि ।
मम प्रियं च कर्तव्यं गच्छावाश्रममुत्तमम् ॥ १०० ॥

॥ मार्कण्डेय उवाच ॥

सावित्री तत उत्थाय केशान्संयम्य भाविनी ।
पतिमुत्थापयामास बाहुभ्यां परिगृह्य वै ॥ १०१ ॥
उत्थाय सत्यवांश्चापि प्रमृज्याङ्गानि पाणिना ।
दिशः सर्वाः समालोक्य कठिने दृष्टिमादधे ॥ १०२ ॥
तमुवाचापि सावित्री श्वः फलानि हरिष्यसि ।
योगक्षेमार्थमेतं ते नेष्यामि परशुं त्वहम् ॥ १०३ ॥

Digitized by Google

कृत्वा कठिनभारं सा वृक्षशाखावलम्बिनम् ।
गृहीत्वा परशुं भर्तुः सकाशं पुनरागमत् ॥ १०४ ॥
वामे स्कन्धे तु वामोरूर्भर्तुर्बाहुं निवेश्य सा ।
दक्षिणेन परिष्वज्य जगाम मृदुगामिनी ॥ १०५ ॥

॥ सत्यवानुवाच ॥

अभ्यासागमनाद्भीरु पन्थानो विदिता मम ।
वृक्षान्तरालोकितया ज्योत्स्नया चोपलक्षये ॥ १०६ ॥
आगतौ स्वः पथा येन फलान्यवचितानि च ।
यथागतं शुभे गच्छ पन्थानं मा विचारय ॥ १०७ ॥
पलाशखण्डे चैतस्मिन्पन्था व्यावर्तते द्विधा ।
तस्योत्तरेण यः पन्थास्तेन गच्छ त्वरस्व च ॥ १०८ ॥
स्वस्थोस्मि बलवानस्मि दिदृक्षुः पितरावुभौ ।
ब्रुवन्नेव त्वरायुक्तः संप्रायादाश्रमं प्रति ॥ १०९ ॥

॥ इति महाभारते सावित्र्युपाख्याने पञ्चमः सर्गः ॥ ५ ॥

---

॥ मार्कण्डेय उवाच ॥

एतस्मिन्नेव काले तु द्युमत्सेनो महाबलः ।
लब्धचक्षुः प्रसन्नायां दृष्ट्यां सर्वं ददर्श ह ॥ १ ॥
स सर्वानाश्रमान्गत्वा शैव्यया सह भार्यया ।
पुत्रहेतोः परामार्त्तिं जगाम पुरुषर्षभः ॥ २ ॥
तावाश्रमान्नदीश्चैव वनानि च सरांसि च ।
तस्यां निशि विचिन्वन्तौ दंपती परिजग्मतुः ॥ ३ ॥

Digitized by Google

श्रुत्वा शब्दं तु यं कंचिदुन्मुखौ सुतशङ्कया ।
सावित्रीसहितोभ्येति सत्यवानित्यभाषताम् ॥ ४ ॥
भिन्नैश्च पुरुषैः पादैः सव्रणैः शोणितोक्षितैः ।
कुशकण्टकविद्धाङ्गावुन्मत्ताविव धावतः ॥ ५ ॥
ततोभिश्रित्य तैर्विप्रैः सर्वैराश्रमवासिभिः ।
परिवार्य समाश्वास्य समानीतौ स्वमाश्रमम् ॥ ६ ॥
तत्र भार्यासहायः स वृतो वृद्धैस्तपोधनैः ।
आश्वासितो विचित्रार्थैः पूर्वराज्ञां कथाश्रयैः ॥ ७ ॥
ततस्तौ पुनराश्वस्तौ वृद्धौ पुत्रदिदृक्षया ।
बाल्यवृत्तानि पुत्रस्य स्मरन्तौ भृशदुःखितौ ॥ ८ ॥
पुनरुक्त्वा च करुणां वाचं च शोककर्षितौ ।
हा पुत्र हा साध्वि वधु क्वासि क्वासीत्यवदताम् ॥ ९ ॥

॥ ब्राह्मणः सुवर्चा उवाच ॥

यशास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १० ॥

॥ गौतम उवाच ॥

वेदाः साङ्गा मयाधीतास्तपो मे संचितं महत् ।
कौमारं ब्रह्मचर्यं मे गुरवोग्निश्च तोषितः ॥ ११ ॥
समाहितेन तीर्णानि सर्वाण्येव व्रतानि च ।
वायुभक्षोपवासश्च कृतो मे विधिवत्सदा ॥ १२ ॥
अनेन तपसा वेद्मि सर्वं परश्चिकीर्षितम् ।
सत्यमेतन्निबोध त्वं म्रियते सत्यवानिति ॥ १३ ॥



Digitized by Google

॥ शिष्य उवाच ॥

उपाध्यायस्य मे वक्त्राद्यथा वाक्यं विनिःसृतम् ।
नैव जातु भवेन्मिथ्या तथा जीवति सत्यवान् ॥ १४ ॥

॥ ऋषय ऊचुः ॥

यथास्य भार्या सावित्री सर्वैरेव सुलक्षणैः ।
अवैधव्यकरैर्युक्ता तथा जीवति सत्यवान् ॥ १५ ॥

॥ भारद्वाज उवाच ॥

यथास्य भार्या सावित्री तपसा च दमेन च ।
आचारेण च संयुक्ता तथा जीवति सत्यवान् ॥ १६ ॥

॥ दाल्भ्य उवाच ॥

यथा दृष्टिः प्रवृत्ता ते सावित्र्याश्च यथा व्रतम् ।
यथाहारमकृत्वा च तथा जीवति सत्यवान् ॥ १७ ॥

॥ माण्डव्य उवाच ॥

यथा वदन्ति शान्तायां दिशि वै मृगपक्षिणः ।
पार्थिवी च प्रवृत्तिस्ते तथा जीवति सत्यवान् ॥ १८ ॥

॥ धौम्य उवाच ॥

सर्वैर्गुणैरुपेतस्ते यथा पुत्रो जनप्रियः ।
दीर्घायुर्लक्षणोपेतस्तथा जीवति सत्यवान् ॥ १९ ॥

॥ मार्कण्डेय उवाच ॥

एवमाश्वासितस्तैस्तु सत्यवाग्भिस्तपस्विभिः ।
तांस्तान्विगणयन्नर्थांस्ततः स्थिर इवाभवत् ॥ २० ॥

Digitized by Google

ततो मुहूर्तात्सावित्री भर्त्रा सत्यवता सह ।
आजगामाश्रमं रात्रौ प्रहृष्टा प्रविवेश ह ॥ २१ ॥

॥ ब्राह्मणा ऊचुः ॥

पुत्रेण संगतं त्वां च चक्षुष्मन्तं निरीक्ष्य च ।
सर्वे वयं वै पृच्छामो वृद्धिं ते पृथिवीपते ॥ २२ ॥
समागमेन पुत्रस्य सावित्र्या दर्शनेन च ।
चक्षुषश्चात्मनो लाभात्त्रि भिर्दिष्ट्या विवर्धसे ॥ २३ ॥
सर्वैरस्माभिरुक्तं यत्तत्तथा नात्र संशयः ।
भूयो भूयश्च वृद्धिस्ते क्षिप्रमेव भविष्यति ॥ २४ ॥

॥ मार्कण्डेय उवाच ॥

ततोग्निं तत्र संज्वाल्य द्विजास्ते सर्व एव हि ।
उपासांचक्रिरे पार्थ द्युमत्सेनं महीपतिम् ॥ २५ ॥
शैव्या च सत्यवांश्चैव सावित्री चैकतः स्थिताः ।
सर्वैस्तैरभ्यनुज्ञाता विशोकाः समुपाविशन् ॥ २६ ॥
ततो राज्ञा समासीनाः सर्वे ते वनवासिनः ।
जातकौतूहलाः पार्थ पप्रच्छुर्नृपतेः सुतम् ॥ २७ ॥
प्रागेव नागतं कस्मात्सभार्येण त्वया विभो ।
विरात्रे चागतं कस्मात्कोनुबन्धश्च तेभवत् ॥ २८ ॥
संतापितः पिता माता वयं चैव तथा नृप ।
कस्मादिति न जानीमस्तत् सर्वं वक्तुमर्हसि ॥ २९ ॥

॥ सत्यवानुवाच ॥

पित्राहमभ्यनुज्ञातः सावित्रीसहितो गतः ।
अथ मेभूच्छिरोदुःखं वने काष्ठानि भिन्दतः ॥ ३० ॥

Digitized by Google

सुप्तश्चाहं वेदनया चिरमित्युपलक्षये ।
तावत्कालं न च मया सुप्तपूर्वं कदाचन ॥ ३१ ॥
सर्वेषामेव भवतां संतापो मा भवेदिति ।
अतो विरात्रागमनं नान्यदस्तीति कारणम् ॥ ३२ ॥

॥ गौतम उवाच ॥

अकस्माच्चक्षुषः प्राप्तिर्द्युमत्सेनस्य ते पितुः ।
नास्य त्वं कारणं वेत्सि सावित्री वक्तुमर्हति ॥ ३३ ॥
श्रोतुमिच्छामि सावित्रि त्वं हि वेत्थ परावरम् ।
त्वां हि जानामि सावित्रि सावित्रीमिव तेजसा ॥ ३४ ॥
त्वमत्र हेतुं जानीषे तस्मात्सत्यं निरुच्यताम् ।
रहस्यं यदि ते नास्ति किंचिदत्र वदस्व नः ॥ ३५ ॥

॥ सावित्र्युवाच ॥

एवमेतद्यथा वेत्थ संकल्पो नान्यथा हि वः ॥
न हि किंचिद्रहस्यं मे श्रूयतां तथ्यमेव यत् ३६ ॥
मृत्युर्मे भर्तुराख्यातो नारदेन महर्षिणा ।
स चाद्य दिवसः प्राप्तस्ततो नैनं जहाम्यहम् ॥ ३७ ॥
सुप्तं चैनं यमः साक्षादुपागच्छत्सकिंकरः ।
स एनमनयद्बद्ध्वा दिशं पितृनिषेविताम् ॥ ३८ ॥
अस्तौषं तमहं देवं सत्येन वचसा विभुम् ।
पञ्च वै तेन मे दत्ता वराः शृणुत तान्मम ॥ ३९ ॥
चक्षुषी च स्वराज्यं च द्वौ वरौ श्वशुरस्य मे ।
लब्धं पितुः पुत्रशतं पुत्राणामात्मनः शतम् ॥ ४० ॥

Digitized by Google

चतुर्वर्षशतायुर्मे लब्धो भर्ता च सत्यवान् ।
भर्तुर्हि जीवनार्थाय मया तीर्णं व्रतं स्थिरम् ॥ ४१ ॥
एतत्सत्यं मयाख्यातं कारणं विस्तरेण वः ।
यथावृत्तं सुखोदर्कमिदं दुःखं महन्मम ॥ ४२ ॥

॥ ऋषय ऊचुः ॥

निमज्जमानं व्यसनैरभिद्रुतं कुलं नरेन्द्रस्य तमोमये ह्रदे ।
त्वया सुशीलव्रतदमयुक्तया समुद्धृतं साध्वि पुनः कुलीनया ॥ ४३ ॥

॥ मार्कण्डेय उवाच ॥

तथा प्रशस्य ह्यभिपूज्य चैव ते वरस्त्रियं तामृषयः समागताः ।
नरेन्द्रमामन्त्र्य सपुत्रमञ्जसा शिवेन जग्मुर्मुदिताः स्वमालयम् ॥

॥ इति महाभारते सावित्र्युपाख्याने षष्ठः सर्गः ॥ ६ ॥

---

॥ मार्कण्डेय उवाच ॥

तस्यां रात्र्यां व्यतीतायामुदिते सूर्यमण्डले ।
कृतपौर्वाह्णिकाः सर्वे समीयुस्ते तपोधनाः ॥ १ ॥
तदेव सर्वे सावित्र्या महाभाग्यं महर्षयः ।
द्युमत्सेनाय नातृप्यन्कथयन्तः पुनः पुनः ॥ २ ॥
ततः प्रकृतयः सर्वाः शाल्वेभ्योऽभ्यागता नृप ।
आचख्युर्निहतं चैव स्वेनामात्येन तं द्विषम् ॥ ३ ॥
तं मन्त्रिणा हतं श्रुत्वा ससहायं सबान्धवम् ।
न्यवेदयन्यथावृत्तं विद्रुतं च द्विषद्बलम् ॥ ४ ॥



Digitized by Google

ऐकमत्यं च सर्वस्य जनस्यासीन्नृपं प्रति ।
सचक्षुर्वाप्यचक्षुर्वा स नो राजा भवत्विति ॥ ५ ॥
अनेन निश्चयेनेह वयं प्रस्थापिता नृप ।
प्राप्तानीमानि यानानि चतुरङ्गं च ते बलम् ॥ ६ ॥
प्रयाहि राजन्भद्रं ते तुष्टस्ते नगरे जयः ।
अभ्यास्त्र चिररात्राय पितृपैतामहं पदम् ॥ ७ ॥
चक्षुष्मन्तं तु तं दृष्ट्वा राजानं वपुषान्वितम् ।
मूर्ध्ना निपतिताः सर्वे विस्मयोत्फुल्ललोचनाः ॥ ८ ॥
ततोभिवाद्य तान्वृद्धान्द्विजानाश्रमवासिनः ।
तैश्चाभिपूजितः सर्वैः प्रययौ नगरं प्रति ॥ ९ ॥
शैव्या च सह सावित्र्या स्वास्तीर्णेन सुवर्चसा ।
नरयुक्तेन यानेन प्रययौ सेनया वृतः ॥ १० ॥
ततोभिषिषिचुः प्रीत्या द्युमत्सेनं पुरोहिताः ।
पुत्रं चास्य महात्मानं यौवराज्येभ्यषेचयन् ॥ ११ ॥
ततः कालेन महता सावित्र्याः कीर्तिवर्धनम् ।
तद्वै पुत्रशतं जज्ञे शूराणामविवर्तिनाम् ॥ १२ ॥
भ्रातॄणां सोदराणां च तथैवास्याभवच्छतम् ।
मद्राधिपस्याश्वपतेर्मालव्यां सुमहाबलम् ॥ १३ ॥
एवमात्मा पिता माता श्वश्रूः श्वशुर एव च ।
भर्तुः कुलं च सावित्र्या सर्वं कृच्छ्रात्समुद्धृतम् ॥ १४ ॥
तथैवैषापि कल्याणी द्रौपदी शीलसंमता ।
तारयिष्यति वः सर्वान्सावित्रीव कुलाङ्गना ॥ १५ ॥

॥ वैशंपायन उवाच ॥

एवं स पाण्डवस्तेनानुज्ञातो महात्मना ।
विशोको विज्वरो राजन्काम्यके न्यवसत्तदा ॥ १६ ॥

Digitized by Google

यश्चेदं शृणुयाद्भक्त्या सावित्र्याख्यानमुत्तमम् ।
स सुखी सर्वसिद्धार्थो न दुःखं प्राप्नुयान्नरः ॥ १७ ॥

॥ इति महाभारते सावित्र्युपाख्यानं समाप्तम् ॥ ७ ॥

---

Bomb. Ed. Vol.-

## ॥ द्रौपदीप्रमाथः ॥ III. 261-270

॥ वैशंपायन उवाच ॥

तस्मिन्बहुमृगेरण्ये भ्रटमाना महारथाः ।
काम्यके भरतश्रेष्ठा विजह्रुस्ते यथामराः ॥ १ ॥
प्रेक्ष्यमाणा बहुविधान्वनोद्देशान्समन्ततः ।
यथर्तुकालरम्याश्च वनराजीः सुपुष्पिताः ॥ २ ॥
पाण्डवा मृगयाशीलाश्चरन्तस्तन्महद्वनम् ।
विजह्रुरिन्द्रप्रतिमाः कंचित्कालमरिंदम ॥ ३ ॥
ततस्ते यौगपद्येन ययुः सर्वे चतुर्दिशम् ।
मृगयां पुरुषव्याघ्रा ब्राह्मणार्थे परंतपाः ॥ ४ ॥
द्रौपदीमाश्रमे न्यस्य तृणबिन्दोरनुज्ञया ।
महर्षेर्दीप्ततपसो धौम्यस्य च पुरोधसः ॥ ५ ॥
ततस्तु राजा सिन्धूनां वार्द्धक्षत्रिर्महायशाः ।
विवाहकामः शाल्वेयान्प्रयातः सोभवत्तदा ॥ ६ ॥
महता परिवर्हेण राजयोग्येन संवृतः ।
राजभिर्बहुभिः सार्धमुपायात्काम्यकं च सः ॥ ७ ॥
तत्रापश्यत्प्रियां भार्यां पाण्डवानां यशस्विनीम् ।
तिष्ठन्तीमाश्रमद्वारि द्रौपदीं निर्जने वने ॥ ८ ॥

Digitized by Google

विभ्राजमानां वपुषा बिभ्रतीं रूपमुत्तमम् ।
भ्राजयन्तीं वनोद्देशं नीलाभ्रमिव विद्युतम् ॥ ९ ॥
अप्सरा देवकन्या वा माया वा देवनिर्मिता ।
इति कृत्वाञ्जलिं सर्वे ददृशुस्तामनिन्दिताम् ॥ १० ॥
ततः स राजा सिन्धूनां वार्द्धक्षत्रिर्जयद्रथः ।
विस्मितस्त्वनवद्याङ्गीं दृष्ट्वासीद्धृष्टमानसः ॥ ११ ॥
स कोटिकाश्यं राजानमब्रवीत्काममोहितः ।
कस्य त्वेषानवद्याङ्गी यदि वापि न मानुषी ॥ १२ ॥
विवाहार्थो न मे कश्चिदिमां प्राप्यातिसुन्दरीम् ।
एतामेवाहमादाय गमिष्यामि स्वमालयम् ॥ १३ ॥
गच्छ जानीहि सौम्यैनां कस्य वात्र कुतोपि वा ।
किमर्थमागता सुभ्रूरिदं कण्टकितं वनम् ॥ १४ ॥
अपि नाम वरारोहा मामेवालोक्य सुन्दरी ।
भजेदायतापाङ्गी सुदन्ती तनुमध्यमा ॥ १५ ॥
अप्यहं कृतकामः स्यामिमां प्राप्य वरस्त्रियम् ।
गच्छ जानीहि कोन्वस्या नाथ इत्येव कोटिक ॥ १६ ॥
स कोटिकाश्यस्तच्छ्रुत्वा रथात्प्रस्कन्द्य कुण्डली ।
उपेत्य पप्रच्छ तदा कृष्णा व्याघ्रवधूमिव ॥ १७ ॥
॥ इति महाभारते द्रौपदीप्रमाथे प्रथमः सर्गः ॥ १ ॥

---

॥ कोटिक उवाच ॥

का त्वं कदम्बस्य विनाम्य शाखामेकाश्रमे तिष्ठसि शोभमाना ।
देदीप्यमानाग्निशिखेव नक्तं दोधूयमाना पवनेन सुभ्रु ॥ १ ॥

Digitized by Google

अतीव रूपेण समन्विता त्वं न चाप्यरण्येषु बिभेषि किं नु ।
देवी नु यक्षी यदि दानवी वा वराप्सरा दैत्यवराङ्गना वा ॥ २ ॥

वपुष्मती वोरगराजकन्या वनेचरी वा क्षणदाचरस्त्री ।
यद्वेव राज्ञो वरुणस्य पत्नी यमस्य सोमस्य धनेश्वरस्य ॥ ३ ॥

धातुर्विधातुः सवितुर्विभोर्वा शक्रस्य वा त्वं सदनात्प्रपन्ना ।
न ह्येव नः पृच्छसि ये वयं स्म न चापि जानीम तवेह नाथम् ॥४॥

वयं हि मानं तव वर्धयन्तः पृच्छाम भद्रे प्रभवं प्रभुं च ।
आचक्ष्व बन्धूंश्च पतिं कुलं च तत्त्वेन यद्वेह करोषि कार्यम् ॥ ५ ॥

अहं तु राज्ञः सुरथस्य पुत्री यं कोटिकाश्येति विदुर्मनुष्याः ।
असौ तु यस्तिष्ठति काञ्चनाङ्गे रथे हुतोग्निश्चयने यथैव ॥ ६ ॥

त्रिगर्तराजः कमलायताक्षः क्षेमंकरो नाम स एष वीरः ॥
अस्मात्परस्त्वेष महाधनुष्मान्पुत्रः कलिंगाधिपतेर्वरिष्ठः । ७ ॥

निरीक्षते त्वां विपुलायताक्षः सुविस्मितः पर्वतवासनित्यः ।
असौ तु यः पुष्करिणीसमीपे श्यामो युवा तिष्ठति दर्शनीयः ॥ ८ ॥

इक्ष्वाकुराज्ञः सुबलस्य पुत्रः स एष हन्ता द्विषतां सुगात्री ।
यस्यानुयात्रां ध्वजिनः प्रयान्ति सौवीरका द्वादश राजपुत्राः ॥ ९ ॥

शोणाश्वयुक्तेषु रथेषु सर्वे मखेषु दीप्ता इव हव्यवाहाः ।
अङ्गारकः कुञ्जरो गुप्तकश्च शत्रुंजयः सृञ्जयसुप्रवृद्धौ ॥ १० ॥

भयंकरोथ भ्रमरो रविश्च शूरः प्रतापः कुहणश्च नाम ।
यं षट् सहस्रा रथिनोनुयान्ति नागा हयाश्चैव पदातिनश्च ॥ ११ ॥

जयद्रथो नाम यदि श्रुतस्ते सौवीरराजः सुभगे स एषः ।
तस्यापरे भ्रातरो दीनसत्त्वा बलाहकानीकविदारणाद्याः ॥ १२ ॥

सौवीरवीराः प्रवरा युवानो राजानमेते बलिनोनुयान्ति ।



Digitized by Google

एतैः सहायैरुपयाति राजा मरुद्गणैरिन्द्र इवाभिगुप्तः ॥ १३ ॥
अज्ञानतां ख्यापय नः सुकेशि कस्यासि भार्या दुहिता च कस्य ॥१४॥

इति महाभारते द्रौपदीप्रमाथे द्वितीयः सर्गः ॥ २ ॥

---

॥ वैशंपायन उवाच ॥

अथाब्रवीद्द्रौपदी राजपुत्री पृष्टा शिवीनां प्रवरेण तेन।
अवेक्ष्य मन्दं प्रविमुच्य शाखां संगृह्णती कौशिकमुत्तरीयम् ॥ १ ॥
बुद्ध्याभिजानामि नरेन्द्रपुत्र न मादृशी त्वामभिभाषुमर्हति ।
न त्वेव वक्तास्ति तवेह वाक्यमन्यो नरो वाप्यथ वापि नारी ॥ २ ॥
एका ह्यहं संप्रति तेन वाचं ददानि वै भद्र निबोध चेदम् ।
अहं ह्यरण्ये कथमेकमेका त्वामालपेयं निरता स्वधर्मे ॥ ३ ॥
जानामि च त्वां सुरथस्य पुत्रं यं कोटिकाश्येति विदुर्मनुष्याः ।
तस्मादहं शैव्य तथैव तुभ्यमाख्यामि बन्धून्प्रथितं कुलं च ॥ ४ ॥
अपत्यमस्मि द्रुपदस्य राज्ञः कृष्णेति मां शैव्य विदुर्मनुष्याः ।
साहं वृणे पञ्च जनान्पतित्वे ये खाण्डवप्रस्थं गताः श्रुतास्ते ॥ ५ ॥
युधिष्ठिरो भीमसेनार्जुनौ च माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।
ते मां निवेद्येह दिशश्चतस्रो विभज्य पार्था मृगयां प्रयाताः ॥ ६ ॥
प्राचीं राजा दक्षिणां भीमसेनो जयः प्रतीचीं यमजावुदीचीम् ।
मन्ये तु तेषां रथसत्तमानां कालोभितः प्राप्त इहोपयातुम् ॥ ७ ॥
संमानिता यास्यथ तैर्यथेष्टं विमुच्य वाहानवरोहयध्वम् ।
प्रियातिथिर्धर्मसुतो महात्मा प्रीतो भविष्यत्यभिवीक्ष्य युष्मान् ॥ ८ ॥
एतावदुक्त्वा द्रुपदात्मजा सा शैव्यात्मजं चन्द्रमुखी प्रतीता ।
विवेश तां पर्णशालां प्रशस्तां संचिन्त्य तेषामतिथित्वधर्मम् ॥ ९ ॥

इति महाभारते द्रौपदीप्रमाथे तृतीयः सर्गः ॥ ३ ॥

Digitized by Google

॥ वैशंपायन उवाच ॥

तथासीनेषु सर्वेषु तेषु राजसु भारत ।
यदुक्तं कृष्णया सार्धं तत्सर्वं प्रत्यवेदयत् ॥ १ ॥
कोटिकाश्यवचः श्रुत्वा शैव्यं सौवीरकोब्रवीत् ।
यदा वाचं व्याहरन्त्यामस्यां मे रमते मनः ॥ २ ॥
सीमन्तिनीनां मुख्यायां विनिवृत्तः कथं भवान् ।
एतां दृष्ट्वा स्त्रियो मेन्या यथा शाखामृगस्त्रियः ॥ ३ ॥
प्रतिभान्ति महाबाहो सत्यमेतद्ब्रवीमि ते ।
दर्शनादेव हि मनस्तया मेपहृतं भृशम् ॥ ४ ॥
तां समाचक्ष्व कल्याणीं यदि स्याच्छैव्य मानुषी ।

॥ कोटिक उवाच ॥

एषा वै द्रौपदी कृष्णा राजपुत्री यशस्विनी ॥ ५ ॥
पञ्चानां पाण्डुपुत्राणां महिषी संमता भृशम् ।
सर्वेषां चैव पार्थानां प्रिया बहुमता सती ॥ ६ ॥
तया समेत्य सौवीर सौवीराभिमुखो व्रज ।

॥ वैशंपायन उवाच ॥

एवमुक्तः प्रत्युवाच पश्यामो द्रौपदीमिति ॥ ७ ॥
पतिः सौवीरसिन्धूनां दुष्टभावो जयद्रथः ।
स प्रविश्याश्रमं पुण्यं सिंहगोष्ठं वृको यथा ॥ ८ ॥
आत्मनासप्तमः कृष्णामिदं वचनमब्रवीत् ।
कुशलं ते वरारोहे भर्तारस्तेप्यनामयाः ॥ ९ ॥
येषां कुशलकामासि तेपि कच्चिदनामयाः ।

Digitized by Google

॥ द्रौपद्युवाच ॥

अपि ते कुशलं राजन्राष्ट्रे कोशे बले तथा ॥ १० ॥
कच्चिदेकः शिवो नाभ्यान्सौवीरान्सह सिन्धुभिः ।
अनुतिष्ठसि धर्मेण ये चान्ये विदितास्त्वया ॥ ११ ॥
कौरव्यः कुशली राजा कुन्तीपुत्रो युधिष्ठिरः ।
अहं च भ्रातरश्चास्य यांश्चान्यान्परिपृच्छसि ॥ १२ ॥
पाद्यं परिगृहाणेदमासनं च नृपात्मज ।
मृगान्पञ्चशतं चैव प्रातराशं ददानि ते ॥ १३ ॥
ऐणेयान्पृषतान्न्यङ्कून्हरिणाञ्शरभाञ्शशान् ।
ऋक्षान्रुरूञ्शम्बरांश्च गवयांश्च मृगान्बहून् ॥ १४ ॥
वराहान्महिषांश्चैव याश्चान्या मृगजातयः ।
प्रदास्यति स्वयं तुभ्यं कुन्तीपुत्रो युधिष्ठिरः ॥ १५ ॥

॥ जयद्रथ उवाच ॥

कुशलं प्रातराशस्य सर्वं मे दिष्टितं त्वया ।
एहि मे रथमारोह सुखमाप्नुहि केवलम् ॥ १६ ॥
गतश्रीकान्हृतराज्यान्कृपणान्गतचेतसः ।
अरण्यवासिनः पार्थान्नानुरोद्धुं त्वमर्हसि ॥ १७ ॥
न वै प्राज्ञा गतश्रीक भर्तारमुपयुञ्जते ।
युञ्जानमुपयुञ्जीत न श्रियः प्रक्षये वसेत् ॥ १८ ॥
श्रिया विहीना राष्ट्राच्च विनष्टाः शास्वतीः समाः ।
अलं ते पाण्डुपुत्राणां भक्त्या क्लेशमुपासितुम् ॥ १९ ॥
भार्या मे भव सुश्रोणि त्यजैनान्सुखमाप्नुहि ।
अखिलान्सिन्धुसौवीरानाप्नुहि त्वं मया सह ॥ २० ॥

Digitized by Google

॥ द्रौपदीप्रमाथः ॥ ५ ॥

॥ वैशंपायन उवाच ॥

इत्युक्त्वा सिन्धुराजेन वाक्यं हृदयकम्पनम् ।
कृष्णा तस्मादपाक्रामद्देशात्स भ्रुकुटीमुखी ॥ २१ ॥
अवमत्यास्य तद्वाक्यमाक्षिप्य च सुमध्यमा ।
मैवमित्यब्रवीत्कृष्णा लज्जस्वेति च सैन्धवम् ॥ २२ ॥
सा काङ्क्षमाणा भर्तॄणामुपायातमनिन्दिता ।
विलोभयामास परं वाक्यैर्वाक्यानि युंजती ॥ २३ ॥

॥ इति महाभारते द्रौपदीप्रमाथे चतुर्थः सर्गः ॥ ४ ॥

---

॥ वैशंपायन उवाच ॥

सा रोषरागोपहतेन वल्गुना सरागनेत्रेण ननोन्नतभ्रुवा ।
मुखेन विस्फूर्य सुवीरराष्ट्रपं ततोब्रवीत्तं द्रुपदात्मजा पुनः ॥ १ ॥
यशस्विनस्तीक्ष्णविषान्महारथानतिब्रुवन्मूढ न लज्जसे कथम् ।
महेन्द्रकल्पान्निरतान्स्वकर्मसु स्थितान्समूहेष्वपि यक्षरक्षसाम् ॥ २ ॥
न किंचिदीड्यं प्रवदंति पापा वनेचरं वा गृहमेधिनं वा ।
तपस्विनं संपरिपूर्णविद्यं भाषन्ति हैवं श्वनराः सुवीर ॥ ३ ॥
अहं तु मन्ये तव नास्ति कश्चिदेतादृशे क्षत्रियसन्निवेशे ।
यस्त्वद्य पातालमुखे पतन्तं पाणौ गृहीत्वा प्रतिसंहरेत ॥ ४ ॥
नागं प्रभिन्नं गिरिकूटकल्पमुपत्यकां हैमवतीं चरन्तम् ।
दण्डीव यूथादपसेधसे त्वं यो नेतुमाशंससि धर्मराजम् ॥ ५ ॥
बाल्यात्प्रसुप्तस्य महाबलस्य सिंहस्य पक्ष्माणि मुखाल्लुनासि ।
पदा समाहत्य पलायमानः क्रुद्धं यदा द्रक्ष्यसि भीमसेनम् ॥ ६ ॥
महाबलं घोरतरं प्रवृद्धं जातं हरिं पर्वतकन्दरेषु ।

Digitized by Google

प्रसुप्तमुग्रं प्रपदेन हन्सि यः क्रुद्धमायोत्स्यसि जिष्णुमुग्रम् ॥ ७ ॥
कृष्णोरगौ तीक्ष्णमुखौ द्विजिह्वौ मत्तः पदाक्रामसि पुच्छदेशे ।
यः पाण्डवाभ्यां पुरुषोत्तमाभ्यां जघन्यजाभ्यां प्रयुयुत्ससे त्वम् ॥ ८ ॥
यथा च वेणुः कदलो नलो वा फलत्यभावाय न भूतयेत्मनः ।
तथैव मां तैः परिरक्ष्यमाणामादास्यसे कर्कटकीव गर्भम् ॥ ९ ॥

॥ जयद्रथ उवाच ॥

जानामि कृष्णे विदितं ममैतद्यथाविधास्ते नरदेवपुत्राः ।
न त्वेवमेतेन विभीषणेन शक्या वयं त्रासयितुं त्वयाद्य ॥ १० ॥
वयं पुनः सप्तदशेषु कृष्णे कुलेषु सर्वेनवमेषु जाताः ।
षड्भ्यो गुणेभ्योभ्यधिका विहीनान्मन्यामहे द्रौपदि पाण्डु-
पुत्रान् ॥ ११ ॥
सा क्षिप्रमातिष्ठ गजं रथं वा न वाक्यमात्रेण वयं हि शक्याः ।
आशंस वा त्वं कृपणं वदन्ती सौवीरराजस्य पुनः प्रसादम् ॥ १२ ॥

॥ द्रौपद्युवाच ॥

महाबला किं न्विह दुर्बलेव सौवीरराजस्य मताहमस्मि ।
नाहं प्रमाथादिह संप्रतीता सौवीरराजकृपणं वदेयम् ॥ १३ ॥
यस्या हि कृष्णौ पदवीं चरेतां समास्थितावेकरथे समेतौ ।
इन्द्रोपि तां नापहरेत्कथंचिन्मनुष्यमात्रः कृपणः कुतोन्यः ॥ १४ ॥
यथा किरीटी परवीरघाती निघ्नन्रथस्थो द्विषतां मनांसि ।
मदन्तरे त्वद्वृजिनीं प्रवेष्टा कक्षं दहन्नग्निरिवोष्णगेषु ॥ १५ ॥
जनार्दनश्चान्धकवृष्णिवीरो महेष्वासाः कैकयश्चापि सर्वे ।
एते हि सर्वे मम राजपुत्राः प्रहृष्टरूपाः पदवीं चरेयुः ॥ १६ ॥

Digitized by Google

मौर्वीविसृष्टाः स्तनयित्नुघोषाः गाण्डीवमुक्तास्त्वतिवेगवन्तः ।
हस्तं समाहत्य धनंजयस्य भीमाः शरा घोरतरं नदन्ति ॥ १७ ॥
गाण्डीवमुक्तांश्च महाशरौघान्पतंगसंघानिव शीघ्रवेगान् ।
यदा द्रष्टास्यर्जुनेन प्रयुक्तांस्तदा स्वबुद्धिं प्रतिनिन्दितासि ॥ १८ ॥
सशङ्खघोषःसतलत्रघोषो गाण्डीवधन्वा मुहुरुद्वहंश्च ।
यदा शरानर्पयिता तवोरसि तदा मनस्ते किमिवाभविष्यत् ॥ १९ ॥
गदाहस्तं भीममभिद्रवन्तं माद्रीपुत्रौ संपतन्तौ दिशश्च ।
अमर्षजं क्रोधविषं वमन्तौ दृष्ट्वाचिरं तापमुपैष्यसेधम ॥ २० ॥
यथा चाहं नातिचरे कथंचित्पतीन्महार्हान्मनसापि जातु ।
तेनाद्य सत्येन वशीकृतं त्वां द्रष्टास्मि पार्थैः परिकृष्यमाणम् ॥ २१ ॥
न संभ्रमं गन्तुमहं हि शक्या त्वया नृशंसेन विकृष्यमाणा ।
समागता हं हि कुरुप्रवीरैः पुनर्वनं काम्यकमागतास्मि ॥ २२ ॥

॥ वैशंपायन उवाच ॥

सा ताननुप्रेक्ष्य विशालनेत्रा जिघृक्षमाणानवभर्त्सयन्ती ।
प्रोवाच मा मा स्पृशतेति भीता धौम्यं प्रचुक्रोश पुरोहितं सा ॥२३॥
जग्राह तामुत्तरवस्त्रदेशे जयद्रथस्तं समवाक्षिपत्सा ।
तया समाक्षिप्ततनुः स पापः पपात शाखीव निकृत्तमूलः ॥ २४ ॥
प्रगृह्यमाणा तु महाजवेन मुहुर्विनिःश्वस्य च राजपुत्री ।
सा कृष्यमाणा रथमारुरोह धौम्यस्य पादावभिवाद्य कृष्णा ॥ २५ ॥

॥ धौम्य उवाच ॥

नेयं शक्या त्वया नेतुमविजित्य महारथान् ।
धर्मं क्षत्रस्य पौराणमवेक्षस्व जयद्रथ ॥ २६ ॥

Digitized by Google

क्षुद्रं कृत्वा फल पापं त्वं प्राप्स्यसि न संशयः।
आसाद्य पाण्डवान्वीरान् धर्मराजपुरोगमान् ॥ २७ ॥
इत्युक्त्वा ह्रियमाणां तां राजपुत्रीं यशस्विनीम् ।
अन्वगच्छत्तदा धौम्यः पदातिगणमध्यगः ॥ २८ ॥

॥ इति महाभारते द्रौपदीप्रमाथे पञ्चमः सर्गः ॥ ५ ॥

---

॥ वैशंपायन उवाच ॥

ततो दिशः संप्रविहृत्य पार्था मृगान्वराहान्महिषांश्च हत्वा ।
धनुर्धराः श्रेष्ठतमाः पृथिव्यां पृथक् चरन्तः सहिता बभूवुः ॥ १ ॥
ततो मृगव्यालगणानुकीर्णं महावनं तद्विहगोपघुष्टम् ।
भ्रातॄंश्च तानभ्यवदद्युधिष्ठिरः श्रुत्वा गिरो व्याहरतां मृगाणाम् ॥ २ ॥
आदित्यदीप्तां दिशमभ्युपेत्य मृगा द्विजाः क्रूरमिमे वदन्ति ॥
आयासमुग्रं प्रतिवेदयन्तो महावनं शत्रुभिर्बाध्यमानम् ॥ ३ ॥
क्षिप्रं निवर्तध्वमलं मृगेण मनो हि मे दूयते दह्यते च ॥
बुद्धिं समाच्छाद्य च मे समन्युरुद्धूयतो प्राणपतिः शरीरे ॥ ४ ॥
सरः सुपर्णेन हृतोरगं यथा राष्ट्रं यथाराजकमात्तलक्ष्मि ।
एवंविधं मे प्रतिभाति काम्यकं शौण्डैर्यथा पीतरसश्च कुम्भः ॥ ५ ॥
ते सैन्धवैरत्यनिलोग्रवेगैर्महाजवैर्वाजिभिरुह्यमानाः ।
पुक्कैर्बृहद्भिः सुरथैर्नृवीरास्तदाश्रमायाभिमुखा बभूवुः ॥ ६ ॥
तेषां तु गोमायुरनल्पघोषो निवर्ततां वाममुपेत्य पार्श्वम् ।
प्रत्याहरत्तत्प्रविमृश्य राजा प्रोवाच भीमं च धनंजयं च ॥ ७ ॥
यथा वदत्येष विहीनयोनिः शालावृको वाममुपेत्य पार्श्वम् ।
सुव्यक्तमस्मानवमन्य पापैः कृतोभिमर्दः कुरुभिः प्रसह्य ॥ ८ ॥

Digitized by Google

इत्येव ते तद्वनमाविशन्तोमहत्यरण्ये मृगयां चरित्वा ।
बालामपश्यन्त तदा रुदन्तीं धात्रेयिकां प्रेष्यवधूं प्रियायाः ॥ ९ ॥
तामिन्द्रसेनस्त्वरितोभिसृत्य रथादवप्लुत्य ततोभ्यधावत् ।
प्रोवाच चैनां वचनं नरेन्द्र धात्रेयिकामार्त्ततरस्तदानीम् ॥ १० ॥
किं रोदिषि त्वं पतिता धरण्यां किं ते मुखं शुष्यति दीनवर्णम् ।
कच्चिन्न पापैः सुनृशंसकृद्भिः प्रमाथिता द्रौपदी राजपुत्री ॥ ११ ॥
अचिन्त्यरूपा सुविशालनेत्रा शरीरतुल्या कुरुपुंगवानाम् ।
यद्वेव देवी पृथिवीं प्रविष्टा दिवं प्रपन्नाप्यथवा समुद्रम् ॥ १२ ॥
तस्या गमिष्यन्ति पदे हि पार्थास्तथा हि संतप्यति धर्मपुत्रः ।
को हीदृशानामरिमर्दनानां क्लेशक्षमाणामपराजितानाम् ॥ १३ ॥
प्राणैः समाभिष्टतमां जिहीर्षेदनुत्तमं रत्नमिव प्रमूढः ।
न बुध्यते नाथवतीमिहाद्य वहिश्चरं हृदयं पाण्डवानाम् ॥ १४ ॥
कस्याद्य कायं प्रतिभिद्य घोरा महीं प्रवेक्ष्यन्ति शिताः शराग्र्याः ।
मा त्वं शुचस्तां प्रति भीरु विद्धि यथाद्य कृष्णा पुनरेष्यतीति ॥ १५ ॥
निहत्य सर्वान्द्विषतः समग्रान्यार्थाः समेष्यन्त्यथ यात्तसेन्या ।
अथाब्रवीद्धारुमुखं विमृज्य धात्रेयिका सारथिमिन्द्रसेनम् ॥ १६ ॥
जयद्रथेनापहृता प्रमथ्य पत्त्रेन्द्रकल्पान्परिभूय कृष्णा ।
तिष्ठन्ति वर्त्मानि नवान्यमूनि वृक्षाश्च लम्बन्ति तथैव भग्नाः ॥ १७ ॥
आवर्तयध्वं ह्यनुयात शीघ्रं न दूरयातैव हि राजपुत्री ।
संनह्यध्वं सर्व एवेन्द्रकल्पा महान्ति चारूणि च दंशितानि ॥ १८ ॥
गृहीत चापानि महाधनानि शरांश्च शीघ्रं पदवीं चरध्वम् ।
पुरा हि निर्भर्त्सनदण्डमोहिता प्रमोहचित्ता वदनेन शुष्यता ॥ १९ ॥
ददाति कस्मैचिदनर्हते तनुं वराज्यपूर्णामिव भस्मनि स्रुचम् ।
पुरा तुषाग्नाविव हूयते हविः पुरा श्मशाने स्रगिवोपविध्यते ॥ २० ॥



Digitized by Google

पुरा च सोमोध्वरगोवलिह्यते शुना यथा विप्रजने प्रमोहिते ।
महत्यरण्ये मृगयां चरित्वा पुरा शृगालो नलिनीं विगाहते ॥ २१ ॥
मा वः प्रियायाः सुनसं सुलोचनं चन्द्रप्रभाभं वदनं प्रसन्नम् ॥
स्पृशाच्छुभं कश्चिदकृत्यकारी श्वा वै पुरोडाशमिवाध्वरस्थम् ॥
एतानि वर्त्मान्यनुयात शीघ्रं मा वः कालः क्षिप्रमिहात्यगाद्वै ॥ २२ ॥

॥ युधिष्ठिर उवाच ॥

भद्रे प्रतिक्राम नियच्छ वाचं मास्मत्सकाशे परुषाण्यवोचः ॥
राजानो वा यदि वा राजपत्त्रा बलेन मत्ता वञ्चनां प्राप्नुवन्ति ॥ २३ ॥

॥ वैशंपायन उवाच ॥

एतावदुक्त्वा प्रययुर्हि शीघ्रं तान्येव वर्त्मान्यनुवर्तमानाः ।
मुहुर्मुहुर्व्यालवदुच्छ्वसन्तो ज्यां विक्षिपन्तश्च महाधनुर्भ्यः ॥ २४ ॥
ततोपश्रृंस्तस्य सैन्यस्य रेणुमुद्भूतं वै वाजिखुरप्रणुन्नम् ।
पदातीनां मध्यगतं च धौम्यं विक्रोशन्तं भीममभिद्रवेति ॥ २५ ॥
ते शान्त्य धौम्यं परिदीनसत्त्वाः सुखं भवानेष्यति राजपुत्राः ।
श्येना यथैवामिषसंप्रयुक्ता जवेन तत्सैन्यमथाभ्यधावन् ॥ २६ ॥
तेषां महेन्द्रोपमविक्रमाणां संरब्धानां धर्षणाद्याज्ञसेन्याः ।
क्रोधः प्रजज्वाल जयद्रथं च दृष्ट्वा प्रियां तस्य रथे स्थितां च ॥२७॥
प्रचुक्रुशुश्चाप्यथ सिन्धुराजं वृकोदरश्चैव धनंजयश्च ।
यमौ च राजा च महाधनुर्धरास्ततो दिशः संमुमुहुः परेषां ॥ २८ ॥
॥ इति महाभारते द्रौपदीप्रमाथे षष्ठः सर्गः ॥ ६ ॥

---

॥ वैशंपायन उवाच ॥

ततो घोरतरः शब्दो वने समभवत्तदा ।
भीमसेनार्जुनौ दृष्ट्वा क्षत्रियाणाममर्षिणाम् ॥ १ ॥

Digitized by Google

तेषां ध्वजाग्राण्यभिवीक्ष्य राजा स्वयं दुरात्मा कुरुपुंगवानां ।
जयद्रथो याज्ञसेनीमुवाच रथे स्थितां भानुमतीं हतौजाः ॥ २ ॥
आयान्तीमे पञ्च रथाः महान्तो मन्ये च कृष्णे पतयस्तवैते ।
सा जानती ख्यापय नः सुकेशि परं परं पाण्डवानां रथस्थं ॥ ३ ॥

॥ द्रौपद्युवाच ॥

किं ते ज्ञातिर्मूढ महाधनुर्धरैरनायुष्यं कर्म कृत्वातिघोरम् ।
एते वीराः पतयो मे समेता न वः शेषः कश्चिदिहास्ति युद्धे ॥ ४ ॥
आख्यातव्यं त्वेव सर्वं मुमूर्षोर्मया तुभ्यं पृष्टया धर्म एषः ।
न मे व्यथा विद्यते त्वद्भयं वा संपश्यन्त्याः सानुजं धर्मराजम् ॥ ५ ॥
यस्य ध्वजाग्रे नदतो मृदङ्गौ नन्दोपनन्दौ मधुरौ युक्तरूपौ ।
एतं स्वधर्मार्थविनिश्चयज्ञं सदा जनाः कृत्यवन्तोनुयान्ति ॥ ६ ॥
य एष जाम्बूनदशुद्धगौरः प्रचण्डघोणस्तनुरायताक्षः ।
एनं कुरुश्रेष्ठतमं वदन्ति युधिष्ठिरं धर्मसुतं पतिं मे ॥ ७ ॥
अप्येष शत्रोः शरणागतस्य दद्यात्प्राणान्धर्मचारी नृवीरः ।
परेह्येनं मूढ जवेन भूतये त्वमात्मनः प्राञ्जलिर्न्यस्तशस्त्रः ॥ ८ ॥
अथाप्येनं पश्यसि तं रथस्थं महाभुजं शालमिव प्रवृद्धम् ।
सन्दष्टौष्ठं भ्रुकुटीसंहतभ्रुवं वृकोदरो नाम पतिर्ममैषः ॥ ९ ॥
आजानेया बलिनः साधुदान्ता महाबलाः शूरमुदावहन्ति ।
एतस्य कर्माण्यतिमानुषाणि भीमेति शब्दोस्य गतः पृथिव्याम् ॥ १० ॥
नास्यापराधाः शेषमवाप्नुवन्ति नायं वैरं विस्मरते कदाचित् ।
वैरस्यान्तं संविधायोपयाति पश्चाच्छान्तिं न च गच्छत्यतीव ॥ ११ ॥
धनुर्धराग्र्यो धृतिमान्यशस्वी जितेन्द्रियो वृद्धसेवी नृवीरः ।
भ्राता च शिष्यश्च युधिष्ठिरस्य धनंजयो नाम पतिर्ममैषः ॥ १२ ॥

Digitized by Google

यो वै न कामान्न भयान्न लोभात्त्यजेद्धर्मं न नृशंसं च कुर्यात् ।
स एष वैश्वानरतुल्यतेजाः कुन्तीसुतः शत्रुसहः प्रमाथी ।
वः सर्वधर्मार्थविनिश्चयज्ञो भयार्त्तानां भयहर्ता मनीषी ॥ १३ ॥
यस्योत्तमं रूपमाहुः पृथिव्यां यं पाण्डवाः परिरक्षन्ति सर्वे ।
प्राणैर्गरीयांसमनुव्रतं वै स एष वीरो नकुलः पतिर्मे ॥ १४ ॥
यः खड्गयोधी लघुचित्रहस्तो महांश्च धीमान्सहदेवद्वितीयः ।
यस्याद्य कर्म द्रक्ष्यसे मूढसत्त्व शतक्रतो वा दैत्यसेनासु संख्ये ॥ १५ ॥
शूरः कृतास्त्रो मतिमान्मनस्वी प्रियंकरो धर्मसुतस्य राज्ञः ।
य एष चन्द्रार्कसमानतेजा जघन्यजः पाण्डवानां प्रियश्च ॥ १६ ॥
बुद्धया समो यस्य नरो न विद्यते वक्ता तथा सत्सु विनिश्चयज्ञः ।
स एष शूरो नित्यममर्षणश्च धीमान्प्राज्ञः सहदेवः पतिर्मे ॥ १७ ॥
त्यजेत्प्राणान्प्रविशेद्व्यवाहं न त्वेवैष व्याहरेद्धर्मबाह्यम् ।
सदा मनस्वी क्षत्रधर्मे रतश्च कुन्त्याः प्राणैरिष्टतमो नृवीरः ॥ १८ ।
विशीर्यन्तीं नावमिवार्णवान्ते रत्नाभिपूर्णां मकरस्य पृष्ठे ।
सेनां तवेमां हतसर्वयोधां विक्षोभितां द्रक्ष्यसि पाण्डुपुत्रैः १९ ॥
इत्येते वै कथिताः पाण्डुपुत्रा यांस्त्वं मोहादवमन्य प्रवृत्तः ।
यद्येतेभ्यो मुच्यसेरिष्टदेहः पुनर्जन्म प्राप्स्यसे जीव एव ॥ २० ॥

॥ वैशंपायन उवाच ॥

ततः पार्थाः पञ्च पञ्चेन्द्रकल्पास्त्यक्त्वात्रस्थान्प्राञ्जलींस्तान्पदातीन् ।
रथानीकं शरवर्षान्धकारं चक्रुः क्रुद्धाः सर्वतः संनिगृह्य ॥ २१ ॥

॥ इति महाभारते द्रौपदीप्रमाथे सप्तमः सर्गः ॥ ७ ॥

Digitized by Google

वैशंपायन उवाच ॥

संतिष्ठत प्रहरत तूर्णं विपरिधावत ।
इति स्म सैन्धवो राजा चोदयामास तान्नृपान् ॥ १ ॥
ततो घोरतरः शब्दो रणे समभवत्तदा ।
भीमार्जुनयमान्दृष्ट्वा सैन्यानां सयुधिष्ठिरान् ॥ २ ॥
शिविसौवीरसिन्धूनां विषादश्चाप्यजायत ।
तान्दृष्ट्वा पुरुषव्याघ्रान्व्याघ्रानिव बलोत्कटान् ॥ ३ ॥
हेमचित्रसमुत्सेधां सर्वशैक्यायसीं गदाम् ।
प्रगृह्याभ्यद्रवद्भीमः सैन्धवं कालचोदितम् ॥ ४ ॥
तदन्तरमथावृत्य कोटिकाश्योभ्यहारयत् ।
महता रथवंशेन परिवार्य वृकोदरम् ॥ ५ ॥
शक्तितोमरनाराचैर्वीरबाहुप्रचोदितैः ।
कीर्यमाणोपि बहुभिर्न स्म भीमो व्यकम्पत ॥ ६ ॥
गजं तु सगजारोहं पदातींश्च चतुर्दश ।
जघान गदया भीमः सैन्धवध्वजिनीमुखे ॥ ७ ॥
पार्थः पञ्चशताञ्शूरान्पार्वतीयान्महारथान् ।
परीप्समानः सौवीरं जघान ध्वजिनीमुखे ॥ ८ ॥
राजा स्वयं सुवीराणां प्रवराणां प्रहारिणाम् ।
निमेषमात्रेण शतं जघान समरे तदा ॥ ९ ॥
ददृशे नकुलस्तत्र रथात्प्रस्कन्द्य खड्गधृक् ।
शिरांसि पादरक्षाणां वीजवत्प्रवपन्मुहुः ॥ १० ॥

Digitized by Google

सहदेवस्तु सन्धाय रथेन गजयोधिनः ।
पातयामास नाराचैर्द्रुमेभ्य इव वर्हिणः ॥ ११ ॥
ततस्त्रिगर्तः सधनुरवतीर्य महारथात् ।
गदया चतुरो वाहान् राज्ञस्तस्य तदावधीत् ॥ १२ ॥
तमभ्यासगतं राजा पदातिं कुन्तिनन्दनः ।
अर्धचन्द्रेण बाणेन विव्याधोरसि धर्मराट् ॥ १३ ॥
स भिन्नहृदयो वीरो वक्त्राच्छोणितमुद्वमन् ।
पपाताभिमुखः पार्थं छिन्नमूल इव द्रुमः ॥ १४ ॥
इन्द्रसेनद्वितीयस्तु रथात्प्रस्कन्द्य धर्मराट् ।
हताश्वः सहदेवस्य प्रतिपेदे महारथम् ॥ १५ ॥
नकुलं त्वभिसंप्राप्य क्षेमंकरमहामुखौ ।
उभावुभयतस्तीक्ष्णैः शरवर्षैरवर्षताम् ॥ १६ ॥
तोमरैरभिवर्षन्तौ जीमूताविव वार्षिकौ ।
एकैकेन विपाटेन जघ्ने माद्रवतीसुतः ॥ १७ ॥
त्रिगर्तराजः सुरथस्तस्याथ रथधूर्गतः ।
रथमाक्षेपयामास गजेन गजयानवित् ॥ १८ ॥
नकुलस्त्वपभीस्तस्माद्रथाच्चर्मासिपाणिमान् ।
उद्भ्राम्य स्थानमास्थाय तस्थौ गिरिरिवाचलः ॥ १९ ॥
सुरथस्तं गजवरं वधाय नकुलस्य तु ।
प्रेषयामास सक्रोधमभ्युच्छ्रितकरं ततः ॥ २० ॥
नकुलस्तस्य नागस्य समीपपरिवर्तिनः ।
सविषाणं भुजं मूले खड्गेन निरकृन्तत ॥ २१ ॥
स विनद्य महानादं गजः किङ्किणीभूषणः ।
पतन्नवाक्शिरो भूमौ हस्त्यारोहानपोथयत् ॥ २२ ॥

Digitized by Google

स तत्कर्म महत्कृत्वा शूरो माद्रवतीसुतः ।
भीमसेनरथं प्राप्य शर्म लेभे महारथः ॥ २३ ॥

भीमस्त्वापततो राज्ञः कोटिकाश्यस्य संयुगे ।
सूतस्य नुदतो वाहान्क्षुरेणापाहरच्छिरः ॥ २४ ॥

न बुबोध हतं सूतं स राजा बाहुशालिना ।
तस्याश्वा व्यद्रवन्संख्ये हतसूता इतस्ततः ॥ २५ ॥

विमुखं हतसूतं तं भीमः प्रहरतां वरः ।
जघान तलयुक्तेन प्रासेनाभ्येत्य पाण्डवः ॥ २६ ॥

द्वादशानां तु सर्वेषां सौवीराणां धनंजयः ।
चकर्त निशितैर्भल्लैर्धनूंषि च शिरांसि च ॥ २७ ॥

शिबीनिक्वाकुमुख्यांश्च त्रिगर्तान्सैन्धवानपि ।
जघानातिरथः संख्ये बाणगोचरमागतान् ॥ २८ ॥

सादिताः प्रत्यदृश्यन्त बहवः सव्यसाचिना ।
सपताकाश्च मातङ्गाः सध्वजाश्च महारथाः ॥ २९ ॥

प्रच्छाद्य पृथिवीं तस्थुः सर्वमायोधनं प्रति ।
शरीराण्यशिरस्कानि विदेहानि शिरांसि च ॥ ३० ॥

श्वगृध्रकङ्ककाकोलश्येनगोमायुवायसाः ।
अतृप्यंस्तत्र वीराणां हतानां मांसशोणितैः ॥ ३१ ॥

हतेषु तेषु वीरेषु सिन्धुराजो जयद्रथः ।
विमुच्य कृष्णां संत्रस्तः पलायनमनाभवत् ॥ ३२ ॥

स तस्मिन्संकुले सैन्ये द्रौपदीमवतार्य ताम् ।
प्राणप्रेप्सुरुपाधावद्वनं येन नराधिपः ॥ ३३ ॥

Digitized by Google

द्रौपदीं धर्मराजस्तु दृष्ट्वा धौम्यपुरस्कृताम् ।
माद्रीपुत्रेण वीरेण रथमारोपयत्तदा ॥ ३४ ॥
ततस्तद्विद्रुतं सैन्यमपयाते जयद्रथे ।
आदिश्यादिश्य नाराचैराजघान वृकोदरः ॥ ३५ ॥
सव्यसाची तु तं दृष्ट्वा पलायन्तं जयद्रथम् ।
वारयामास निघ्नन्तं भीमं सैन्धवसैनिकान् ॥ ३६ ॥

॥ अर्जुन उवाच ॥

यस्यापराधात्प्राप्तोयमस्मान्क्लेशो दुरासदः ।
तमस्मिन्समरोद्देशे न पश्यामि जयद्रथम् ॥ ३७ ॥
तमेवान्विषभद्रं ते किं ते योधैर्निपातितैः ।
अनामिषमिदं कर्म कथं वा मन्यते भवान् ॥ ३८ ॥

॥ वैशंपायन उवाच ॥

इत्युक्तो भीमसेनस्तु गुडाकेशेन धीमता ।
युधिष्ठिरमभिप्रेक्ष्य वाग्मी वचनमब्रवीत् ॥ ३९ ॥
हतप्रवीरा रिपवो भूयिष्ठं विद्रुता दिशः ।
गृहीत्वा द्रौपदीं राजन्निवर्तस्व भवानितः ॥ ४० ॥
यमाभ्यां सह राजेन्द्र धौम्येन च महात्मना ।
प्राप्याश्रमपदं राजन्द्रौपदीं परिशान्त्वय ॥ ४१ ॥
न हि मे मोक्ष्यते जीवन्मूढः सैन्धवको नृपः ।
पातालतलसंस्थोपि यदि शक्रोस्य सारथिः ॥ ४२ ॥

Digitized by Google

॥ युधिष्ठिर उवाच ।

न हन्तव्यो महाबाहो दुरात्मापि स सैन्धवः ।
दुःशलामभिसंस्मृत्य गान्धारीं च यशस्विनीम् ॥ ४३ ॥

॥ वैशंपायन उवाच ॥

तच्छ्रुत्वा द्रौपदी भीममुवाच व्याकुलेन्द्रिया ।
कुपिता ह्रीमती प्राप्ता पती भीमार्जुनावुभौ ॥ ४४ ॥
कर्तव्यं चेत्प्रियं मह्यं वध्यः स पुरुषाधमः ।
सैन्धवापसदः पापो दुर्मतिः कुलपांसनः ॥ ४५ ॥
भार्याविहर्ता वैरी यो यश्च राज्यहरो रिपुः ।
याचमानोपि संग्रामे न मोक्तव्यः कथंचन ॥ ४६ ॥
इत्युक्तौ तौ नरव्याघ्रौ ययतुर्यत्र सैन्धवः ।
राजा निवृत्ते कृष्णामादाय सपुरोहितः ॥ ४७ ॥
स प्रविश्याश्रमपदं व्यपविद्धवृषीमठम् ।
मार्कण्डेयादिभिर्विप्रैरनुकीर्णं ददर्श ह ॥ ४८ ॥
द्रौपदीमनुशोचद्भिर्ब्राह्मणैस्तैः समाहितैः ।
समियाय महाप्राज्ञः सभार्यो भ्रातृमध्यगः ॥ ४९ ॥
ते स्म तं मुदिता दृष्ट्वा पुनः प्रत्यागतं नृपम् ।
जित्वा तान्सिन्धुसौवीरान्द्रौपदीं चाहृतां पुनः ॥ ५० ॥
स तैः परिवृतो राजा तत्रैवोपविवेश ह ।
प्रविवेशाश्रमं कृष्णा यमाभ्यां सह भाविनी ॥ ५१ ॥
भीमसेनार्जुनौ चापि श्रुत्वा क्रोशगतं रिपुम् ।
स्वयमश्वांस्तुदन्तौ तौ जवेनैवाभ्यधावताम् ॥ ५२ ॥



Digitized by Google

इदमत्यद्भुतं चात्र चकार पुरुषोर्जुनः ।
क्रोशमात्रगतानश्वान्सैन्धवस्य जघान यत् ॥ ५३ ॥
स हि दिव्यास्त्रसंपन्नः कृच्छ्रकालेष्वसंभ्रमः ।
अकरोद्दुष्करं कर्म शरैरस्त्राभिमन्त्रितैः ॥ ५४ ॥
ततोभ्यधावतां वीरावुभौ भीमधनंजयौ ।
हताश्वं सैन्धवं भीतमेकं व्याकुलचेतसम् ॥ ५५ ॥
सैन्धवस्तु हतान्दृष्ट्वा तथाश्वान्स्वान्सुदुःखितः ।
अतिविक्रमकर्माणि कुर्वाणं च धनंजयम् ।
पलायनकृतोत्साहः प्राद्रवद्येन वै वनम् ॥ ५६ ॥
सैन्धवं त्वभिसंप्रेक्ष्य पराक्रान्तं पलायनम् ।
अनुयाय महाबाहुः फाल्गुनो वाक्यमब्रवीत् ॥ ५७ ॥
अनेन वीर्येण कथं स्त्रियं प्रार्थयसे बलात् ।
राजपुत्र निवर्तस्व न ते युक्तं पलायनम् ॥ ५८ ॥
कथं ह्यनुचरान्हित्वा शत्रुमध्ये पलायसे ।
इत्युच्यमानः पार्थेन सैन्धवो न न्यवर्तत ॥ ५९ ॥
तिष्ठ तिष्ठेति तं भीमः सहसाभ्यद्रवद्बली ।
मा वधीरिति पार्थस्तं दयावान्प्रत्यभाषत ॥ ६० ॥
॥ इति महाभारते द्रौपदीप्रमाथेष्टमः सर्गः ॥ ८ ॥

---

॥ वैशंपायन उवाच ॥

जयद्रथस्तु संप्रेक्ष्य भ्रातरावुद्यतायुधौ ।
प्राधावत्पूर्णमव्यग्रो जीवितेप्सुः सुदुःखितः ॥ १ ॥

Digitized by Google

तं भीमसेनं धावन्तमवतीर्य रथाद्बली ।
अभिद्रुत्य निजग्राह केशपक्षे ह्यमर्षणः ॥ २ ॥
समुद्यम्य च तं भीमो निष्पिपेष महीतले ।
शिरो गृहीत्वा राजानं ताडयामास चैव ह ॥ ३ ॥
पुनः संजीवमानस्य तस्योत्पतितुमिच्छतः ।
पदा मूर्ध्नि महाबाहुः प्राहरद्विलपिष्यतः ॥ ४ ॥
तस्य जानु ददौ भीमो जघ्ने चैवमरत्निना ।
स मोहमगमद्राजा प्रहारवरपीडितः ॥ ५ ॥
विरोधं भीमसेनं तु वारयामास फाल्गुनः ।
दुःशलायाः कृते राजा यत्तदाहेति कौरव ॥ ६॥

॥ भीम उवाच ॥

नायं पापसमाचारो मत्तो जीवितुमर्हति ।
कृष्णायास्तदनर्हायाः परिक्लेष्टा नराधमः ॥ ७ ॥
किं तु शक्यं मया कर्तुं यद्राजा सततं घृणी ।
त्वं च बालिशया बुद्ध्या सदैवास्मान्प्रबाधसे ॥ ८ ॥
एवमुक्त्वा सटास्तस्य पञ्च चक्रे वृकोदरः ।
अर्धचन्द्रेण बाणेन किंचिदब्रुवतस्तदा ॥ ९ ॥
विकत्थयित्वा राजानं ततः प्राह वृकोदरः ।
जीवितुं चेच्छसे मूढ हेतुं मे गदतः शृणु ॥ १० ॥
दासोस्मीति त्वया वाच्यं संसत्सु च सभासु च ।
एवं ते जीवितं दद्यामेष युद्धजितो विधिः ॥ ११ ॥
एवमस्त्विति स राजा कृष्यमाणो जयद्रथः ।
प्रोवाच पुरुषव्याघ्रं भीममाहवशोभनम् ॥ १२ ॥
तत एनं विचेष्टन्तं बद्ध्वा पार्थो वृकोदरः ।
रथमारोपयामास विसंज्ञं पांसुगुण्ठितम् ॥ १३ ॥

Digitized by Google

ततस्तं रथमास्थाय भीमः पार्थानुगस्तदा ।
अभ्येत्याश्रममध्यस्थमभ्यगच्छद्युधिष्ठिरम् ॥ १४ ॥
दर्शयामास भीमस्तु तदवस्थं जयद्रथम् ।
तं राजा प्राहसद्दृष्ट्वा मुच्यतामिति चाब्रवीत् ॥ १५ ॥
राजानं चाब्रवीद्भीमो द्रौपद्याः कथ्यतामिति ।
दासभावं गतो ह्येष पाण्डूनां पापचेतनः ॥ १६ ॥
तमुवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः ।
मुञ्चैनमधमाचारं प्रमाणा यदि ते वयम् ॥ १७ ॥
द्रौपदी चाब्रवीद्भीममभिप्रेक्ष्य युधिष्ठिरम् ।
दासोयं मुच्यतां राजन्त्वया पंचसटः कृतः ॥ १८ ॥
स मुक्तोभ्येत्य राजानमभिवाद्य युधिष्ठिरम् ।
ववन्दे विह्वलो राजंस्तांश्च दृष्ट्वा मुनींस्तदा ॥ १९ ॥
तमुवाच घृणी राजा धर्मपुत्रो युधिष्ठिरः ।
तथा जयद्रथं दृष्ट्वा गृहीतं सव्यसाचिना ॥ २० ॥
अदास गच्छ मुक्तोसि मैवं कार्षीः पुनः क्वचित् ।
स्त्रीकामं वा धिगस्तु त्वां क्षुद्र क्षुद्रसहायवान् ।
एवंविधं हि कः कुर्यात्त्वदन्यः पुरुषाधम ॥ २१ ॥
गतसत्त्वमिव ज्ञात्वा कर्तारमशुभस्य तम् ।
संप्रेक्ष्य भरतश्रेष्ठः कृपां चक्रे नराधिपः ॥ २२ ॥
धर्मे ते वर्धतां बुद्धिर्मा चाधर्मे मनः कृथाः ।
साश्वः सरथपादातिः स्वस्ति गच्छ जयद्रथ ॥ २३ ॥
एवमुक्तस्तु सव्रीडं तूष्णीं किंचिदवाङ्मुखः ।
जगाम राजन्दुःखार्त्तो गङ्गाद्वाराय भारत ॥ २४ ॥

---

Digitized by Google

॥ शकुन्तलोपाख्यानम् ॥

॥ वैशंपायन उवाच ॥

पौरवाणां वंशकरो दुष्यन्तो नाम वीर्यवान् ।
पृथिव्याश्चतुरन्ताया गोप्ता भरतसत्तम ॥ १ ॥
चतुर्भागं भुवः कृत्स्नं यो भुङ्क्ते मनुजेश्वरः ।
समुद्रावरणांश्चापि देशान्स समितिंजयः ॥ २ ॥
आम्लेच्छावधिकान्सर्वान्स भुङ्क्ते रिपुमर्दनः ।
रत्नाकरसमुद्रान्तांश्चातुर्वर्ण्यजनावृतान् ॥ ३ ॥
न वर्णसंकरकरो न कृष्याकरकृज्जनः ।
न पापकृत्कश्चिदासीत्तस्मिन्राजनि शासति ॥ ४ ॥
धर्मे रतिं सेवमाना धर्मार्थावभिपेदिरे ।
तदा नरानरव्याघ्र तस्मिञ्जनपदेश्वरे ॥ ५ ॥
नासीच्चौरभयं तात न क्षुधाभयमण्वपि ।
नासीद्व्याधिभयं चापि तस्मिञ्जनपदेश्वरे ॥ ६ ॥
स्वधर्मै रेमिरे वर्णा देवे कर्मणि निस्पृहाः ।
तमाश्रित्य महीपालमासंश्चैवाकुतोभयाः ॥ ७ ॥
कालवर्षी च पर्जन्यः सस्यानि रसवन्ति च ।
सर्वरत्नसमृद्धा च मही पशुमती तथा ॥ ८ ॥

Digitized by Google

स्वकर्मनिरता विप्रा नानृतं तेषु विद्यते ।
स चाद्भुतमहावीर्यो वज्रसंहननो युवा ॥ ९ ॥
उद्यम्य मन्दरं दोर्भ्यां वहेत्सवनकाननम् ।
चतुष्पथगदायुद्धे सर्वप्रहरणेषु च ॥ १० ॥
नागपृष्ठेऽश्वपृष्ठे च बभूव परिनिष्ठितः ।
बले विष्णुसमश्चासीत्तेजसा भास्करोपमः ॥ ११ ॥
अक्षोभ्यत्वेऽर्णवसमः सहिष्णुत्वे धरासमः ।
संमतः स महीपालः प्रसन्नपुरराष्ट्रवान् ॥ १२ ॥
इत्यादिपर्वसंभवपर्वशकुन्तलोपाख्याने प्रथमोऽध्यायः ॥ १ ॥

॥ जनमेजय उवाच ॥

संभवं भरतस्याहं चरितं च महामतेः ।
शकुन्तलायाश्चोत्पत्तिं श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥
दुष्यन्तेन च वीरेण यथा प्राप्ता शकुन्तला ।
तं वै पुरुषसिंहस्य भगवन्विस्तरं त्वहम् ॥ २ ॥
श्रोतुमिच्छामि तत्त्वज्ञ सर्वं मतिमतां वर ।

॥ वैशंपायन उवाच ॥

स कदाचिन्महाबाहुः प्रभूतबलवाहनः ॥ ३ ॥
वनं जगाम गहनं हयनागशतैर्वृतः ।
बलेन चतुरङ्गेण वृतः परमवल्गुना ॥ ४ ॥
खड्गशक्तिधरैर्वीरैर्गदामुसलपाणिभिः ।
प्रासतोमरहस्तैश्च ययौ योधशतैर्वृतः ॥ ५ ॥
सिंहनादैश्च योधानां शङ्खदुन्दुभिनिःस्वनैः ।

Digitized by Google

रथनेमिस्वनैश्चैव सनागवरबृंहितैः ।
नानायुधधरैश्चापि नानावेषधरैस्तथा ॥ ६ ॥
ह्रेषितस्वनमिश्रैश्च क्ष्वेडितास्फोटितस्वनैः ।
आसीत्किलकिलाशब्दस्तस्मिन्गच्छति पार्थिवे ॥ ७ ॥
प्रासादवरशृङ्गस्थाः परया नृपशोभया ।
ददृशुस्तं स्त्रियस्तत्र शूरमात्मयशस्करम् ॥ ८ ॥
शक्रोपममभिघ्नं परवारणवारणम् ।
पश्यन्तः स्त्रीगणास्तत्र वज्रपाणिं समेनिरे ॥ ९ ॥
अयं स पुरुषव्याघ्रो रणे वसुपराक्रमः ।
यस्य बाहुबलं प्राप्य न भवन्त्यसुहृद्गणाः ॥ १० ॥
इति वाचो ब्रुवन्त्यस्तास्त्रियः प्रेम्णा नराधिपम् ।
तुष्टुवुः पुष्पवृष्टीश्च ससृजुस्तस्य मूर्धनि ॥ ११ ॥
तत्र तत्र च विप्रेन्द्रैः स्तूयमानः समन्ततः ।
निर्ययौ परमप्रीत्या वनं मृगजिघांसया ॥ १२ ॥
तं देवराजप्रतिमं मत्तवारणभूषितम् ।
द्विजक्षत्रियविट्शूद्रा निर्यान्तमनुजग्मिरे ॥ १३ ॥
ददृशुर्वर्धमानास्ते आशीर्भिश्च जयेन च ।
सुदूरमनुजग्मुस्तं पौरजानपदास्तथा ॥ १४ ॥
न्यवर्त्तन्त ततः पश्चादनुज्ञाता नृपेण ह ।
सुवर्णप्रतिमेनाथ रथेन वसुधाधिपः ॥ १५ ॥
महीमापूरयामास घोषेण त्रिदिवं तथा ।
स गच्छन्ददृशे धीमान्नन्दनप्रतिमं वनम् ॥ १६ ॥
विल्वार्कखदिराकीर्णं कपित्थधवसंकुलम् ।
विषमं पर्वतस्तम्बैरश्मभिश्च समावृतम् ॥ १७ ॥

Digitized by Google

निर्जलं निर्मनुष्यंच बहुयोजनमायतम् ।
मृगसिंहैर्वृतं घोरैरन्यैश्चापि वनेचरैः १८ ॥
तद्वनं मनुजव्याघ्रः सभृत्यबलवाहनः ।
लोडयामास दुष्यन्तः सूदयन्विविधान्मृगान् ॥ १९ ॥
बाणगोचरसंप्राप्तांस्तत्र व्याघ्रगणान्बहून् ।
पातयामास दुष्यन्तो निर्बिभेद च सायकैः ॥ २० ॥
दूरस्थान्सायकैः कांश्चिदभिनत्स नराधिपः ।
अभ्यासमागतांश्चान्यान् खड्गेन निरकृन्तत ॥ २१ ॥
कांश्चिदेणान्समाजघ्ने शक्त्या शक्तिमतां वरः ।
गदामण्डलतत्त्वज्ञश्चचारामितविक्रमः ॥ २२ ॥
तोमरैरसिभिश्चापि गदामुसलकम्पनैः ।
चचार सविनिघ्नन्वै वन्यांस्तत्र मृगद्विजान् ॥ २३ ॥
राज्ञा चाद्भुतवीर्येण योधैश्च समरप्रियैः ॥
लोड्यमानं महारण्यं तत्यजुः स्म मृगाधिपाः ॥ २४ ॥
तत्र विद्रुतयूथानि हतयूथपतीनि च ॥ २५ ॥
मृगयूथान्यथोत्सुक्याच्छब्दंचक्रुस्ततस्ततः ।
शुष्काश्चापि नदीर्गत्वा जलनैराश्यकर्षिताः ॥ २६ ॥
व्यायामक्लान्तहृदयाः पतन्तिस्म विचेतसः ।
क्षुत्पिपासापरीताश्च श्रान्ताश्च पतिता भुवि ॥ २७ ॥
केचित्तत्र नरव्याघ्रैरभक्ष्यन्त बुभुक्षितैः ।
केचिदग्निमथोत्पाद्य संसाध्य च वनेचराः ॥ २८ ॥
भक्षयन्तिस्म मांसानि प्रकृत्य विधिवत्तदा ।
तत्र केचिद्गजा मत्ता बलिनः शस्त्रविक्षताः ॥ २९ ॥

Digitized by Google

संकोच्याग्रकरान्भीताः प्राद्रवन्ति स्म वेगिताः।
शकृन्मूत्रं सृजन्तश्च क्षरन्तः शोणितं बहु ॥ ३० ॥
वन्या गजवरास्तत्र ममृदुर्मनुजान्बहून्।
तद्वनं बलमेघेन शरधारेण संवृतम् ॥ ३१ ॥
व्यरोचत मृगाकीर्णं राज्ञा हतमृगाधिपम् ॥ ३२ ॥
इत्यादिपर्वणि शकुन्तलोपाख्याने द्वितीयोध्यायः।

॥ वैशंपायन उवाच ॥

ततो मृगसहस्राणि हत्वा स बलवाहनः।
राजा मृगप्रसंङ्गेन वनमन्यद्विवेश ह ॥ १ ॥
एक एवोत्तमबलः क्षुत्पिपासाश्रमान्वितः।
स वनस्यान्तमासाद्य महच्छून्यं समासदत् ॥ २ ॥
तच्चाप्यतीत्य नृपतिरुत्तमाश्रमसंयुतम्।
मनः प्रल्हादजननं दृष्टिकान्तमतीव च ॥ ३
शीतमारुतसंयुक्तं जगामान्यन्महद्वनम्।
पुष्पितैः पादपैः कीर्णमतीवसुखशाद्वलम् ॥ ४ ॥
विपुलं मधुरारावैर्नादितं विहगैस्तथा।
पुंस्कोकिलनिनदैश्च श्लिलोकगणनादितम् ॥ ५ ॥
प्रवृद्धविटपैर्वृक्षैः सुखच्छायैः समावृतम्।
षट्पदाघूर्णिततलं लक्ष्म्या परमया युतम् ॥ ६ ॥
नापुष्पः पादपः कश्चिन्नाफलो नापि कण्टकी।
षट्पदैर्नाप्यपाकीर्णस्तस्मिन्वै काननेभवत् ॥ ७ ॥
विहगैर्नादितं पुष्पैरलंकृतमतीव च।
सर्वर्तुकुसुमैर्वृक्षैः सुखच्छायैः समावृतम् ॥ ८ ॥



Digitized by Google

मनोरमं महेष्वासो विवेश वनमुत्तमम् ।
मारुताकलितास्तत्र द्रुमाः कुसुमशालिनः ॥ ९ ॥
पुष्पवृष्टिं विचित्रां तु व्यसृजंस्ते पुनः पुनः ।
दिवस्पृशोथ संघुष्टाः पक्षिभिर्मधुरस्वनैः ॥ १० ॥
विरेजुः पादपास्तत्र विचित्रकुसुमाम्बराः ।
तेषां तत्र प्रवालेषु पुष्पभारावनामिषु ॥ ११ ॥
रुवन्ति रावान्मधुरान्षट्पदामधुलिप्सवः ।
तत्र प्रदेशांश्च बहून्कुसुमोत्करमण्डितान् ॥ १२ ॥
लतागृहपरिक्षिप्तान्मनसः प्रीतिवर्धनान् ।
संपश्यन्सुमहातेजा बभूव मुदितस्तदा ॥ १३ ॥
परस्पराश्लिष्टशाखैः पादपैः कुसुमान्वितैः ।
अशोभत वनं तत्तु महेन्द्रध्वजसंनिभैः ॥ १४ ॥
सिद्धचारणसंघैश्च गन्धर्वाप्सरसां गणैः ।
सेवितं वनमत्यर्थं मत्तवानरकिंनरम् ॥ १५ ॥
सुखः शीतः सुगन्धी च पुष्परेणुवहोनिलः ।
परिक्रामन्वने वृक्षानुपैतीव रिरंसया ॥ १६ ॥
एवं गुणसमायुक्तं ददर्श स वनं नृपः ।
नदीकच्छोद्भवं कान्तमुच्छ्रितध्वजसंनिभम् ॥ १७ ॥
प्रेक्षमाणो वनं तत्तु सुप्रहृष्टविहंगमम् ।
आश्रमप्रवरं रम्यं ददर्श च मनोरमम् ॥ १८ ॥
नानावृक्षसमाकीर्णं संप्रज्वलितपावकम् ।
तं तदाप्रतिमं श्रीमानाश्रमं प्रत्यपूजयत् ॥ १९॥
यतिभिर्वालखिल्यैश्च वृतं मुनिगणान्वितम् ।
अग्न्यगारैश्च बहुभिः पुष्पसंस्तरसंस्तृतम् ॥ २० ॥

Digitized by Google

महाकच्छैर्बृहद्भिश्च विभ्राजितमतीव च ।
मालिनीमभितो राजन्नदीं पुण्यां सुखोदकाम् ॥ २१ ॥
नैकपक्षिगणाकीर्णां तपोवनमनोरमाम् ।
तत्र व्यालमृगान्सौम्यान्पश्यन्प्रीतिमवाप सः ॥ २२ ॥
तं चाप्रतिरथः श्रीमान्नाश्रमं प्रत्यपद्यत ।
देवलोकप्रतीकाशं सर्वतः सुमनोहरम् ॥ २३ ॥
नदीं चाश्रमसंश्लिष्टां पुण्यतोयां ददर्श सः ।
सर्वप्राणभृतां तत्र जननीमिवाधिष्ठिताम् ॥ २४ ॥
सचक्रवाकपुलिनां पुष्पफेन प्रवाहिनीम् ।
सकिन्नरगणावासां वानरर्क्षनिषेविताम् ॥ २५ ॥
पुण्यस्वाध्यायसंघुष्टां पुलिनैरुपशोभिताम् ।
मत्तवारणशार्दूलभुजगेन्द्रनिषेविताम् ॥ २६ ॥
तस्यास्तीरे भगवतः काश्यपस्य महात्मनः ।
आश्रमप्रवरं रम्यं महर्षिगणसेवितम् ॥ २७ ॥
नदीमाश्रमसंबद्धां दृष्ट्वाश्रमपदं तथा ।
चकाराभिप्रवेशाय मतिं स नृपतिस्तदा ॥ २८ ॥
अलंकृतं दीपवत्या मालिन्या रम्यतीरया ।
नरनारायणस्थानं गंगयेवोपशोभितम् ॥ २९ ॥
मत्तबर्हिणसंघुष्टं प्रविवेश महद्वनम् ।
तत्स चैत्ररथप्रख्यं समुपेत्य नरर्षभः ॥ ३० ॥
अतीवगुणसंपन्नमनिर्देश्यं च वर्चसा ।
महर्षिं काश्यपं द्रष्टुमथ कण्वं तपोधनम् ॥ ३१ ॥
ध्वजिनीमश्वसंबाधां पदातिगजसंकुलाम् ।
अवस्थाप्य वनद्वारि सेनामिदमुवाच सः ॥ ३२ ॥

Digitized by Google

मुनिं विरजसं द्रष्टुं गमिष्यामि तपोधनम् ।
काश्यपं स्थीयतामत्र यावदागमनं मम ॥ ३३ ॥
तद्वनं नन्दनप्रख्यमासाद्य मनुजेश्वरः ।
क्षुत्पिपासे जहौ राजा मुदं चावाप पुष्कलाम् ॥ ३४ ॥
सामात्यो राजलिङ्गानि सोपनीय नराधिपः ।
पुरोहितसहायश्च जगामाश्रममुत्तमम् ॥ ३५ ॥
दिदृक्षुस्तत्र तमृषिं तपोराशिमथाव्ययम् ।
ब्रह्मलोकप्रतीकाशमाश्रमं सोभिवीक्ष्य ह ॥ ३६ ॥
षट्पदोद्गीतसंघुष्टं नानाद्विजगणायुतम् ।
ऋचो बह्वृचमुख्यैश्च प्रेर्यमाणाः पदक्रमैः ॥ ३७ ॥
शुश्राव मनुजव्याघ्रो वितते ऽध्वरे कर्मसु ।
यज्ञविद्याङ्गविद्भिश्च यजुर्विद्भिश्च शोभितम् ॥ ३८ ॥
मधुरैः सामगीतैश्च ऋषिभिर्नियतव्रतैः ।
भारुण्डसामगीताभिरथर्वशिरसोद्गतैः ॥ ३९ ॥
यतात्मभिः सुनियतैः शुशुभे स तदाश्रमः ।
अथर्ववेदप्रवराः पूगयज्ञियसागमाः ॥ ४० ॥
संहितामोरयन्ति स्म पदक्रमयुतां तु ते ।
शब्दसंस्कारसंयुक्तैर्ब्रुवद्भिश्चापरैर्द्विजैः ॥ ४१ ॥
नादितः स बभौ श्रीमान्ब्रह्मलोक इवापरः ।
यज्ञसंस्तरविद्भिश्च क्रमशिक्षाविशारदैः ॥ ४२ ॥
न्यायतत्त्वात्मविज्ञानसंपन्नैर्वेदपारगैः ।
नानावाक्यसमाहारसमवायविशारदैः ॥ ४३ ॥
विशेषकार्यविद्भिश्च मोक्षधर्मपरायणैः ।
स्थापनाक्षेपसिद्धान्तपरमार्थज्ञतां गतैः ॥ ४४ ॥

Digitized by Google

शब्दच्छन्दोनिरुक्तज्ञैः कालज्ञानविशारदैः ।
द्रव्यकर्मगुणज्ञैश्च कार्यकारणवेदिभिः ॥ ४५ ।
पक्षिवानररुतज्ञैश्च व्यासग्रन्थसमाश्रितैः ।
नानाशास्त्रेषु मुख्यैश्च शुश्राव स्वनमीरितम् ॥ ४६ ॥
लोकायतिकमुख्यैश्च समन्तादनुनादितम् ।
तत्र तत्र च विप्रेन्द्रान्नियतान्संशितव्रतान् ॥ ४७ ॥
जपहोमपरान्विप्रान्ददर्श परवीरहा ।
आसनानि विचित्राणि रुचिराणि महीपतिः ॥ ४८ ॥
प्रयत्नोपहितानि स्म दृष्ट्वा विस्मयमागमत् ।
देवतायतनानां च प्रेक्ष्य पूजां कृतां द्विजैः ।
ब्रह्मलोकस्थमात्मानं मेने स नृपसत्तमः ॥ ४९ ॥
स काश्यपतपोगुप्तमाश्रमप्रवरं शुभम् ।
नातृप्यत्प्रेक्षमाणो वै तपोवनगुणैर्युतम् ॥ ५० ॥
स काश्यपस्यायतनं महाव्रतैर्वृतं समन्तादृषिभिस्तपोधनैः ।
विवेश सामात्यपुरोहितोरिहा विविक्तमत्यर्थमनोहरं शुभम् ॥ ५१ ॥

॥ इति श्रीमहाभारते आदिपर्वणि संभवपर्वणि शकुन्तलोपाख्याने तृतीयोध्यायः ॥ ३ ॥

॥ वैशंपायन उवाच ॥

ततोगच्छन्महाबाहुरेकोमात्यान्विसृज्य तान् ।
नापश्यच्चाश्रमे तस्मिंस्तमृषिं संशितव्रतम् ॥ १ ॥
सोपश्यमानस्तमृषिं शून्यं दृष्ट्वा तथाश्रमम् ।
उवाच क इहेत्युच्चैर्वनं संनादयन्निव ॥ २ ॥
श्रुत्वाथ तस्य तं शब्दं कन्याश्रीरिव रूपिणी ।
निश्चक्रामाश्रमात्तस्मात्तापसीवेषधारिणी ॥ ३ ॥

Digitized by Google

सा तं दृष्ट्वैव राजानं दुष्यन्तमसितेक्षणा ।
स्वागतं त इति क्षिप्रमुवाच प्रतिपूज्य च ॥ ४ ॥
आसनेनार्चयित्वा च पाद्येनार्घ्येण चैव हि ।
पप्रच्छानामयं राजन्कुशलं च नराधिपम् ॥ ५ ॥
यथावदर्चयित्वाथ पृष्ट्वा चानामयं तदा ।
उवाच स्मयमानेव किं कार्यं क्रियतामिति ॥ ६ ॥
तामब्रवीत्ततो राजा कन्यां मधुरभाषिणीम् ।
दृष्ट्वाचैवानवद्याङ्गीं यथावत्प्रतिपूजितः ॥ ७ ॥
आगतोहं महाभागमृषिं कण्वमुपासितुम् ।
क्व गतो भगवान्भद्रे तन्ममाचक्ष्व शोभने ॥ ८ ॥

॥ शकुन्तलोवाच ॥

गतः पिता मे भगवान्फलान्याहर्तुमाश्रमात् ।
मुहूर्तं सप्रतीक्षस्व द्रष्टास्येनमुपागतम् ॥ ९ ॥

॥ वैशंपायन उवाच ॥

अपश्यमानस्तमृषिं तथा चोक्तस्तया च सः ।
तां दृष्ट्वा च वरारोहां श्रीमतीं चारुहासिनीं ॥ १० ॥
विभ्राजमानां वपुषा तपसा च दमेन च ।
रूपयौवनसंपन्नामित्युवाच महीपतिः ॥ ११ ॥
का त्वं कस्यासि सुश्रोणि किमर्थं चागता वनम् ।
एवं रूपगुणोपेता कुतस्त्वमसि शोभने ॥ १२ ॥
दर्शनादेव हि शुभे त्वया मेपहृतं मनः ।
इच्छामि त्वामहं ज्ञातुं तन्ममाचक्ष्व शोभने ॥ १३ ॥

Digitized by Google

एवमुक्ता तु सा कन्या तेन राज्ञा तमाश्रमे ।
उवाच हसती वाक्यमिदं सुमधुराक्षरम् ॥ १४ ॥
कण्वस्याहं भगवतो दुष्यन्त दुहिता मता ।
तपस्विनो धृतिमतो धर्मज्ञस्य महात्मनः ॥ १५ ॥

॥ दुष्यन्त उवाच ॥

ऊर्ध्वरेता महाभागे भगवाँल्लोकपूजितः ।
चलेद्धि वृत्ताद्धर्मोऽपि न चलेत्संशितव्रतः ॥ १६ ॥
कथं त्वं तस्य दुहिता संभूता वरवर्णिनी ।
संशयो मे महानत्र तन्मे छेत्तुमिहार्हसि ॥ १७ ॥

॥ शकुंतलोवाच ॥

यथायमागमो मह्यं यथा चेदमभूत्पुरा ।
शृणु राजन्यथातत्त्वं यथास्मि दुहिता मुनेः ॥ १८ ॥
ऋषिः कश्चिदिहागम्य मम जन्माभ्यचोदयत् ।
तस्मै प्रोवाच भगवान्यथा तच्छृणु पार्थिव ॥ १९ ॥

॥ कण्व उवाच ॥

तप्यमानः किल पुरा विश्वामित्रो महत्तपः ।
सुभृशं तापयामास शक्रं सुरगणेश्वरम् ॥ २० ॥
तपसा दीप्तवीर्योयं स्थानान्मां च्यावयेदिति ।
भीतः पुरंदरस्तस्मान्मेनकामिदमब्रवीत् ॥ २१ ॥
गुणैरप्सरसां दिव्यैर्मेनके त्वं विशिष्यसे ।
श्रेयो मे कुरु कल्याणि यत्त्वां वक्ष्यामि तच्छृणु ॥ २२ ॥
असावादित्यसंकाशो विश्वामित्रो महातपाः ।
तप्यमानस्तपोघोरं मम कम्पयते मनः ॥ २३ ॥

Digitized by Google

मेनके तव भारोयं विश्वामित्रः सुमध्यमे ।
शंसितात्मा सुदुर्धर्ष उग्रे तपसि वर्तते ॥ २४ ॥
स मां न च्यावयेत्स्थानात्तं वै गत्वा प्रलोभय ।
चर तस्य तपोविघ्नं कुरु मेविघ्नमुत्तमम् ॥ २५ ॥
रूपयौवनमाधुर्यचेष्टितस्मितभाषणैः ।
लोभयित्वा वरारोहे तपसस्तं निवर्तय ॥ २६ ॥

॥ मेनकोवाच ॥

महातेजाः स भगवांस्तथैव च महातपाः ।
कोपनश्च तथा ह्येनं जानाति भगवानपि ॥ २७ ॥
तेजसस्तपसश्चैव कोपस्य च महात्मनः ।
त्वमप्युद्विजसे यस्य नोद्विजेयमहं कथम् ॥ २८ ॥
महाभागं वसिष्ठं यः पुत्रैरिष्टैर्व्ययोजयत् ।
क्षत्रजातश्च यः पूर्वमभवद्ब्राह्मणो बलात् ॥ २९ ॥
शौचार्थं यो नदीं चक्रे दुर्गमां बहुभिर्जलैः ।
यां तां पुण्यतमां लोके कौशिकीति विदुर्जनाः ॥ ३० ॥
बभार यत्रास्य पुरा काले दुर्गे महात्मनः ।
दारान्मतंगो धर्मात्मा राजर्षिर्व्यधतां गतः ॥ ३१ ॥
अतीतकाले दुर्भिक्षे अभ्येत्य पुनराश्रमम् ।
मुनिः पारेति नद्या वै नाम चक्रे तदा प्रभुः ॥ ३२ ॥
मतंगं याजयांचक्रे यत्र प्रीतमनाः स्वयम् ।
त्वं च सोमं भयाद्यस्य गतः पातुं सुरेश्वर ॥ ३३ ॥
चकारान्यं च लोकं वै क्रुद्धो नक्षत्रसंपदा ।
प्रतिश्रवणपूर्वाणि नक्षत्राणि चकार यः ॥ ३४ ॥
गुरुशापहतस्यापि त्रिशङ्कोः शरणं ददौ ।

Digitized by Google

एतानि यस्य कर्माणि तस्याहं भृशमुद्विजे ॥ ३५ ॥
यथासौ न दहेत्क्रुद्धस्तथाज्ञापय मां विभो ।
तेजसा निर्दहेल्लोकान्कम्पयेद्धरणीं पदा ॥ ३६ ॥
संक्षिपेच्च महामेरुं तूर्णमावर्तयेद्दिशः ।
तादृशं तपसा युक्तं प्रदीप्तमिव पावकम् ॥ ३७ ॥
कथमस्मद्विधा नारी जितेन्द्रियमभिस्पृशेत् ।
हुताशनमुखं दीप्तं सूर्यचन्द्राक्षितारकम् ॥ ३८ ॥
कालजिह्वं सुरश्रेष्ठ कथमस्मद्विधा स्पृशेत् ।
यमश्च सोमश्च महर्षयश्च साध्या विश्वे वालखिल्याश्च सर्वे ।
एतेपि यस्योद्विजन्ते प्रभावात्तस्मात्कस्मान्मादृशी नोद्विजेत ॥ ३९ ॥
त्वयैवमुक्ता च कथं समीपमृषेर्न गच्छेयमहं सुरेन्द्र ।
रक्षां तु मे चिन्तय देवराज यथा त्वदर्थं रक्षिता चरेयम् ॥ ४० ॥
कामं तु मे मारुतस्तत्र वासः प्रक्रीडितायां विवृणोतु देव ।
भवेच्च मे मन्मथस्तत्र कार्ये सहायभूतस्तु तव प्रसादात् ॥ ४१ ॥
वनाच्च वायुः सुरभिः प्रवायात्तस्मिन्काले तमृषिं लोभयन्त्याः ।
तथेत्युक्त्वा विहितेचैव तस्मिंस्ततो ययौ साश्रमं कौशिकस्य ॥४२॥
॥ इति श्रीमहाभारत आदिपर्वणि संभवपर्वणि शकुन्तलोपाख्याने
चतुर्थोध्यायः ॥ ४ ॥

॥ कण्व उवाच ॥

एवमुक्तस्तया शक्रः संदिदेश सदागतिम् ।
प्रातिष्ठत तदा काले मेनका वायुना सह ॥ १ ॥
अथापश्यद्वरारोहा तपसा दग्धकिल्बिषम् ।
विश्वामित्रं तप्यमानं मेनका भीरुराश्रमे ॥ २ ॥



Digitized by Google

अभिशप्तं ततः सा तं प्राक्रीडदृषिसंनिधौ ।
अपोवाह च वासोस्या मारुतः शशिसंनिभम् ॥ ३ ॥
सागच्छत्त्वरिता भूमिं वासस्तदभिलिप्सती ।
स्मयमानेव सव्रीडं मारुतं वरवर्णिनी ॥ ४ ॥
पश्यतस्तत्र तत्रर्षेरप्यग्निसमतेजसः ।
विश्वामित्रस्ततस्तां तु विषमस्थामनिन्दिताम् ॥ ५ ॥
गृद्धां वाससि संभ्रान्तां मेनकां मुनिसत्तमः ।
अनिर्देश्यवयोरूपामपश्यद्विवृतां तदा ॥ ६ ॥
तस्या रूपगुणान्दृष्ट्वा स तु विप्रर्षभस्तदा ।
चकार भावं संसर्गात्तया कामवशं गतः ॥ ७ ॥
न्यमन्त्रयत चाप्येनां साचाप्यैच्छदनिन्दिता ।
तौ तत्र सुचिरं कालमुभौ व्यहरतां तदा ॥ ८ ॥
रममाणौ यथाकामं यथैकदिवसं तथा ।
जनयामास स मुनिर्मेनकायां शकुन्तलाम् ॥ ९ ॥
प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम् ।
जातमुत्सृज्य तं गर्भं मेनका मालिनीमनु ॥ १० ॥
कृतकार्या ततस्त्वूर्णमगच्छच्छक्रसंसदम् ।
तं वने विजने गर्भं सिंहव्याघ्रसमाकुले ॥ ११ ॥
दृष्ट्वा शयानं शकुनाः समन्तात्पर्यवारयन् ।
नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिनः ॥ १२ ॥
पर्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम् ।
उपस्प्रष्टुं गतश्चाहमपश्यं शयितामिमाम् ॥ १३ ॥
निर्जने विपिने रम्ये शकुन्तैः परिवारिताम् ।
आनयित्वा ततश्चैनां दुहितृत्वे न्यवेशयम् ॥ १४ ॥

Digitized by Google

शरीरकृत्प्राणदाता यस्य चान्नानि भुञ्जेत ।
क्रमेणैते त्रयोप्युक्ताः पितरो धर्मशासने ॥ १५ ॥
निर्जने तु वने यस्माच्छकुन्तैः परिवारिता ।
शकुंतलेति नामास्याः कृतं चापि ततो मया । १६ ॥
एवं दुहितरं विद्धि मम विप्र शकुन्तलाम् ।
शकुन्तला च पितरं मन्यते मामनिन्दिता ॥ १७ ॥

॥ शकुन्तलोवाच ॥

एतदाचष्ट पृष्टः सन्मम जन्म महर्षये ।
सुतां कण्वस्य मामेवं विद्धि त्वं मनुजाधिप ॥ १८ ॥
कण्वं हि पितरं मन्ये पितरं स्वमजानती ।
इति ते कथितं राजन्यथावृत्तं श्रुतं मया ॥ १९ ॥
॥ इति श्रीमहाभारत आदिपर्वणि शकुन्तलोपाख्याने पञ्चमो
ध्यायः ॥ ५ ॥

॥ दुष्यन्त उवाच ॥

सुव्यक्तं राजपुत्री त्वं यथा कल्याणि भाषसे ।
भार्या मे भव सुश्रोणि ब्रूहि किं करवाणि ते ॥ १ ॥
सुवर्णमालां वासांसि कुण्डले परिहाटके ।
नानापत्तनजे शुभ्रे मणिरत्ने च शोभने ॥ २ ॥
आहरामि तवाद्याहं निष्कादीन्यजिनानि च ।
सर्वं राज्यं तवाद्यास्तु भार्या मे भव शोभने ॥ ३ ॥
गान्धर्वेण च मां भीरु विवाहेनैहि सुन्दरि ।
विवाहानां हि सर्वेषां गान्धर्वः श्रेष्ठ उच्यते ॥ ४ ॥

Digitized by Google

॥ शकुन्तलोवाच ॥

फलाहारो गतो राजन्पिता मे इत आश्रमात् ।
मुहूर्तं संप्रतीक्षस्व स मां तुभ्यं प्रदास्यति ॥ ५ ॥

॥ दुष्यन्त उवाच ॥

इच्छामि त्वां वरारोहे भजमानामनिन्दिते ।
त्वदर्थं मां स्थितं विद्धि त्वद्व्रतं हि मनो मम ॥ ६ ॥
आत्मनो बन्धुरात्मैव गतिरात्मैव चात्मनः ।
आत्मनैवात्मनो दानं कर्तुमर्हसि धर्मतः ॥ ७ ॥
अष्टावेव समासेन विवाहा धर्मतः स्मृताः ।
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः ॥ ८ ॥
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमः स्मृतः ।
तेषां धर्मान्यथापूर्वं मनुः स्वायंभुवोब्रवीत् ॥ ९ ॥
प्रशस्तांश्चतुरः पूर्वान्ब्राह्मणस्योपधारय ।
षडानुपूर्व्या क्षत्रस्य विद्धि धर्मानिनिन्दिते ॥ १० ॥
राज्ञां तु राक्षसोप्युक्तो विट्शूद्रेष्वासुरः स्मृतः ॥
पञ्चानां तु त्रयो धर्म्या अधर्म्यौ द्वौ स्मृताविह ॥ ११ ॥
पैशाच आसुरश्चैव न कर्तव्यौ कदाचन ।
अनेन विधिना कार्यो धर्मस्यैषा गतिः स्मृता ॥ १२ ॥
गान्धर्वराक्षसौ क्षत्रे धर्म्यौ तौ माविशंकिथाः ।
पृथग्वा यदि वा मिश्रौ कर्तव्यौ नात्र संशयः ॥ १३ ॥
सा त्वं मम सकामस्य सकामा वरवर्णिनी ।
गान्धर्वेण विवाहेन भार्या भवितुमर्हसि ॥ १४ ॥

Digitized by Google

॥ शकुन्तलोवाच ॥

यदि धर्मपथस्त्वेष यदि चात्मा प्रभुर्मम ।
प्रदाने पौरवश्रेष्ठ शृणु मे समयं प्रभो ॥ १५ ॥
सत्यं मे प्रतिजानीहि यथा वक्ष्याम्यहं रहः ।
मयि जाते ततः पुत्रः स भवेत्त्वदनन्तरः ॥ १६ ॥
युवराजो महाराज सत्यमेतद्ब्रवीमि ते ।
यद्येतदेवं दुष्यन्त अस्तु मे संगमस्त्वया ॥ १७ ॥

॥ वैशंपायन उवाच ॥

एवमस्त्विति तां राजा प्रत्युवाचाविचारयन् ।
अपि च त्वां हि नेष्यामि नगरं स्वं शुचिस्मिते ॥ १८ ॥
यथा त्वमर्हा सुश्रोणी सत्यमेतद्ब्रवीमि ते ।
एवमुक्त्वा स राजर्षिस्तामनिन्दितगामिनीम् ॥ १९ ॥
जग्राह विधिवत्पाणावुवास च तया सह ।
विश्वास्य चैनां स प्रायादब्रवीच्च पुनः पुनः ॥ २० ॥
प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम् ।
तया त्वा नाययिष्यामि निवासं स्वं शुचिस्मिते ॥ २१ ॥

॥ वैशंपायन उवाच ॥

इति तस्याः प्रतिश्रुत्य स नृपो जनमेजय ।
मनसा चिन्तयन्प्रायात्काश्यपं प्रति पार्थिवः ॥ २२ ॥
भगवांस्तपसा युक्तः श्रुत्वा किं नु करिष्यति ।
एवं स चिन्तयन्नेव प्रविवेश स्वकं पुरम् ॥ २३ ॥
मुहूर्तयाते तस्मिंस्तु कण्वोप्याश्रममागमत् ।
शकुन्तला च पितरं ह्रिया नोपजगाम तम् ॥ २४ ॥

Digitized by Google

विज्ञायाथ च तां कण्वो दिव्यज्ञानो महातपाः ।
उवाच भगवान्प्रीतः पश्यन्दिव्येन चक्षुषा ॥ २५ ॥
त्वयात्र भद्रे रहसि मामनादृत्य यः कृतः ।
पुंसा सह समायोगो न स धर्मोपघातकः ॥ २६ ॥
क्षत्रियस्य हि गान्धर्वो विवाहः श्रेष्ठ उच्यते ।
सकामायाः सकामेन निर्मन्त्रो रहसि स्मृतः ॥ २७ ॥
धर्मात्मा च महात्मा च दुष्यन्तः पुरुषोत्तमः ।
अभ्यागच्छ पतिं यत्त्वं भजमानं शकुन्तले ॥ २८ ॥
महात्मा जनिता लोके पुत्रस्तव महाबलः ।
य इमां सागरापाङ्गीं कृत्स्नां भोक्ष्यति मेदिनीम् ॥ २९ ॥
परं चाभिप्रयातस्य चक्रं तस्य महात्मनः ।
भविष्यत्यप्रतिहतं सततं चक्रवर्तिनः ॥ ३० ॥
ततः प्रक्षाल्य पादौ सा विश्रान्तं मुनिमब्रवीत् ।
विनिधाय ततो भारं संनिधाय फलानि च ॥ ३१ ॥

॥ शकुन्तलोवाच ॥

मया पतिर्वृतो राजा दुष्यन्तः पुरुषोत्तमः ।
तस्मै स सचिवाय त्वं प्रसादं कर्तुमर्हसि ॥ ३२ ॥

॥ कण्व उवाच ॥

प्रसन्न एव तस्याहं त्वत्कृते वरवर्णिनि ।
गृहाण च वरं मत्तस्त्वं शुभे यदभीप्सितम् ॥ ३३ ॥

॥ वैशंपायन उवाच ॥

ततो धर्मिष्ठतां वव्रे राज्याच्चास्खलनं तथा ।
शकुन्तला पौरवाणां दुष्यन्तहितकाम्यया ॥ ३४ ॥

Digitized by Google

इति श्रीमहाभारत आदिपर्वणि संभवपर्वणि शकुन्तलोपाख्याने षष्ठोऽध्यायः ॥ ६ ॥

॥ वैशंपायन उवाच ॥

प्रतिज्ञाय तु दुष्यन्ते प्रतियाते शकुन्तलाम् ।
गर्भं सुषाव वामोरूः कुमारममितौजसम् ॥ १ ॥
त्रिषु वर्षेषु पूर्णेषु दीप्तानलसमद्युतिम् ।
रूपौदार्यगुणोपेतं दौष्यन्तिं जनमेजय ॥ २ ॥
जातकर्मादिसंस्कारं कण्वः पुण्यकृतां वरः ।
विधिवत्कारयामास वर्धमानस्य धीमतः ॥ ३ ॥
दन्तैः शुक्लैः शिखरिभिः सिंहसंहननो महान् ।
चक्राङ्कितकरः श्रीमान्महामूर्धा महाबलः ॥ ४ ॥
कुमारो देवगर्भाभः स तत्राशु व्यवर्धत ।
षड्वर्ष एव बालः स कण्वाश्रमपदं प्रति ॥ ५ ॥
सिंहव्याघ्रान्वराहांश्च महिषांश्च गजांस्तथा ।
बबन्ध वृक्षे बलवानाश्रमस्य समीपतः ॥ ६ ॥
आरोहन्दमयंश्चैव क्रीडंश्च परिधावति ।
ततोस्य नाम चक्रुस्ते कण्वाश्रमनिवासिनः ॥ ७ ॥
अस्त्वयं सर्वदमनः सर्वं हि दमयत्यसौ ।
स सर्वदमनो नाम कुमारः समपद्यत ॥ ८ ॥
विक्रमेणौजसा चैव बलेन च समन्वितः ।
तं कुमारमृषिर्दृष्ट्वा कर्म चास्यातिमानुषम् ॥ ९ ॥
समयो यौवराज्यायेत्यब्रवीच्च शकुन्तलाम् ।
तस्य तद्बलमाज्ञाय कण्वः शिष्यानुवाच ह ॥ १० ॥

Digitized by Google

शकुन्तलामिमां शीघ्रं सहपुत्रामितो गृहात् ।
भर्तुः प्रापयतागारं सर्वलक्षणपूजिताम् ॥ ११ ॥
नारीणां चिरवासोहि बान्धवेषु न रोचते ।
कीर्तिचारित्रधर्मघ्नस्तस्मान्नयत माचिरम् ॥ १२ ॥
तथेत्युक्त्वा तु ते सर्वे प्रातिष्ठन्त महौजसः ।
शकुन्तलां पुरस्कृत्य सपुत्रां गजसाह्वयम् ॥ १३ ॥
गृहीत्वामरगर्भाभं पुत्रं कमललोचनम् ।
आजगाम ततः सुभ्रूर्दुष्यन्तं विदिताद्वनात् ॥ १४ ॥
अभिसृत्य च राजानं विदिता च प्रवेशिता ।
सह तेनैव पुत्रेण बालार्कसमतेजसा ॥ १५ ॥
निवेदयित्वा ते सर्वं आश्रमं पुनरागताः ।
पूजयित्वा यथान्यायमब्रवीच्च शकुन्तला ॥ १६ ॥
अयं पुत्रस्त्वया राजन्यौवराज्येऽभिषिच्यताम् ।
त्वया ह्ययं सुतो राजन्मय्युत्पन्नः सुरोपमः ॥ १७ ॥
यथासमयमेतस्मिन्वर्तस्व पुरुषोत्तम ।
यथा मत्संगमे पूर्वं यः कृतः समयस्तथा ॥ १८ ॥
तं स्मरस्व महाभाग कण्वाश्रमपदं प्रति ।
सोथ श्रुत्वैव तद्वाक्यं तस्या राजा स्मरन्नपि ॥ १९ ॥
अब्रवीच्च स्मरामीति कस्य त्वं दुष्टतापसि ।
धर्मकामार्थसंबन्धं न स्मरामि त्वया सह ॥ २० ॥
गच्छ वा तिष्ठ वा कामं यद्वापीच्छसि तत्कुरु ।
सैवमुक्त्वा वरारोहा व्रीडितेव तपस्विनी ॥ २१ ॥
निःसंज्ञेव च दुःखेन तस्थौ स्थूणेव निश्चला ।
संरम्भामर्षताम्राक्षी स्फुरमाणौष्ठसंपुटा ॥ २२ ॥

Digitized by Google

कटाक्षैर्निर्दहन्तीव तिर्यग्राजानमैक्षत ।
आकारं गूहमाना च मन्युना च समीरिता ॥ २३ ॥
तपसा संभृतं तेजो धारयामास वै तदा ।
सा मुहूर्तमिव ध्यात्वा दुःखामर्षसमन्विता ॥ २४ ॥
भर्तारमभिसंप्रेक्ष्य क्रुद्धा वचनमब्रवीत् ।
जानन्नपि महाराज कस्मादेवं प्रभाषसे ॥ २५ ॥
न जानामीति निःशङ्कं यथान्यः प्राकृतो जनः ।
अत्र ते हृदयं वेद सत्यस्यैवानृतस्य च ॥ २६ ॥
कल्याणं वद साक्षेण मात्मानमवमन्यथाः ।
योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ॥ २७ ॥
किं तेन न कृतं पापं चौरेणात्मापहारिणा ॥
एकोहमस्मीति च मन्यसे त्वं न ह्युच्छयं वेत्सि मुनिं पुराणम् ॥
यो वेदिता कर्मणः पापकस्य तस्यान्तिके त्वं वृजिनं करोषि ॥ २८ ॥
मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥ २९ ॥
आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च ॥
अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तम् ॥ ३० ॥
यमो वैवस्वतस्तस्य निर्यातयति दुष्कृतम् ।
हृदि स्थितः कर्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति ॥ ३१ ॥
न तु तुष्यति यस्यैष पुरुषस्य दुरात्मनः ।
तं यमः पापकर्माणं वियातयति दुष्कृतम् ॥ ३२ ॥
योवमन्यात्मनात्मानमन्यथा प्रतिपद्यते ।
न तस्य देवाः श्रेयांसो यस्यात्मापि न कारणम् ॥ ३३ ॥



Digitized by Google

स्वयंप्राप्तेति मामेवं मावमंस्थाः पतिव्रताम् ।
अर्चार्हो नार्चयसि मां स्वयं भार्यामुपस्थिताम् ॥ ३४ ॥
किमर्थं मां प्राकृतवदुपप्रेक्षसि संसदि ।
न खल्वहमिदं शून्ये रौमि किं न शृणोषि मे ॥ ३५ ॥
यदि मे याचमानाया वचनं न करिष्यसि ।
दुष्यन्त शतधा मूर्धा ततस्तेद्य स्फुटिष्यति ॥ ३६ ॥
भार्यां पतिः संप्रविश्य स यस्माज्जायते पुनः ।
जायायास्तद्धि जायात्वं पौराणाः कवयो विदुः ॥ ३७ ॥
यदागमवतः पुंसस्तदपत्यं प्रजायते ।
तत्तारयति संतत्या पूर्वप्रेतान्पितामहान् ॥ ३८ ॥
पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः ।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥ ३९ ॥
सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ ४० ॥
अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा ।
भार्या मूलं त्रिवर्गस्य भार्या मूलं तरिष्यतः ॥ ४१ ॥
भार्यावन्तः क्रियावन्तः सभार्या गृहमेधिनः ।
भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विताः ॥ ४२ ॥
सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः ।
पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः ॥ ४३ ॥
कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै ।
यः सदारः स विश्वास्यस्तस्माद्दारा गतिः परा ॥ ४४ ॥
संसरन्तमपि प्रेतं विषमेष्वेकपातिनम् ।
भार्यैवान्वेति भर्तारं सततं या पतिव्रता ॥ ४५ ॥

Digitized by Google

प्रथम संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते ।
पूर्वं मृतं च भर्तारं पश्चात्साध्व्यनुगच्छति ॥ ४६ ॥
एतस्मात्कारणाद्राजन्पाणिग्रहणमिष्यते ।
यदाप्नोति पतिर्भार्यामिहलोके परत्र च ॥ ४७ ॥
आत्मात्मनैव जनितः पुत्र इत्युच्यते बुधैः ।
तस्माद्भार्यां नरः पश्येन्मातृवत्पुत्रमातरम् ॥ ४८ ॥
भार्यायां जनितं पुत्रमादर्शेष्विव चाननम् ।
ह्लादते जनिता प्रेक्ष्य स्वर्गं प्राप्येव पुण्यकृत् ॥ ४९ ॥
दह्यमाना मनोदुःखैर्व्याधिभिश्चातुरा नराः ।
ह्लादन्ते स्वेषु दारेषु घर्मार्त्ताः सलिलेष्विव ॥ ५० ॥
सुसंरब्धोपि रामाणां न कुर्यादप्रियं नरः ।
रतिं प्रीतिं च धर्मं च तास्वायत्तमवेक्ष्य हि ॥ ५१ ॥
आत्मनो जन्मनः क्षेत्रं पुण्यं रामाः सनातनम् ।
ऋषीणामपि का शक्तिः स्रष्टुं रामामृते प्रजाम् ॥ ५२ ॥
प्रतिपद्य यदा सूनुर्धरणीरेणुगुण्ठितः ।
पितुराश्लिष्यतेऽङ्गानि किमस्त्यभ्यधिकं ततः ॥ ५३ ॥
स त्वं स्वयमभिप्राप्तं साभिलाषमिमं सुतम् ।
प्रेक्षमाणं कटाक्षेण किमर्थमवमन्यसे ॥ ५४ ॥
अण्डानि बिभ्रति स्वानि न भिन्दन्ति पिपीलिकाः ।
न भरेथाः कथं नु त्वं धर्मज्ञः सन्स्वमात्मजम् ॥ ५५ ॥
नवाससां न रामाणां नापां स्पर्शस्तथाविधः ।
शिशोरालिङ्ग्यमानस्य स्पर्शः सूनोर्यथा सुखः ॥ ५६ ॥
ब्राह्मणो द्विपदां श्रेष्ठो गौर्वरिष्ठा चतुष्पदाम् ।
गुरुर्गरीयसां श्रेष्ठः पुत्रः स्पर्शवतां वरः ॥ ५७ ॥

Digitized by Google

स्पृशतु त्वां समाश्लिष्य पुत्रोयं प्रियदर्शनः ।
पुत्रस्पर्शात्सुखतरः स्पर्शो लोके न विद्यते ॥ ५८ ॥
त्रिषु वर्षेषु पूर्णेषु प्रजातोहमरिंदम ।
इमं कुमारं राजेन्द्र तव शोकविनाशनम् ॥ ५९ ॥
आहर्ता वाजिमेधस्य शतसंख्यस्य पौरव ।
इति वागन्तरिक्षे मां सूतकेभ्यवदत्पुरा ॥ ६० ॥
ननु नामाङ्कमारोप्य स्नेहाद्ग्रामान्तरं गताः ।
मूर्ध्नि पुत्रानुपाघ्राय प्रतिनन्दन्ति मानवाः ॥ ६१ ॥
वेदेष्वपि वदन्तीमं मन्त्रग्रामं द्विजातयः ।
जातकर्मणि पुत्राणां तवापि विदितं तथा ॥ ६२ ॥
अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥ ६३ ॥
जीवितं त्वदधीनं मे संतानमपि चाक्षयम् ।
तस्मात्त्वं जीव मे पुत्र सुसुखो शरदां शतम् ॥ ६४ ॥
त्वदङ्गेभ्यः प्रसूतोयं पुरुषात्पुरुषोपरः ।
सरसीवामलेत्मानं द्वितीयं पश्य वै सुतम् ॥ ६५ ॥
यथा ह्याहवनीयोग्निर्गार्हपत्यात्प्रणीयते ।
तथा त्वत्तः प्रसूतोयं त्वमेकः सन्द्विधा कृतः ॥ ६६ ॥
मृगावकृष्टेन पुरा मृगयां परिधावता ।
अहमासादिता राजन्कुमारी पितुराश्रमे ॥ ६७ ॥
उर्वशी पूर्वचित्तिश्च सहजन्या च मेनका ।
विश्वाची च घृताची च षडेवाप्सरसां वराः ॥ ६८ ॥
तासां सा मेनका नाम ब्रह्मयोनिर्वराप्सराः ।
दिवः संप्राप्य जगतीं विश्वामित्रादजीजनत् ॥ ६९ ॥

Digitized by Google

सा मां हिमवतः प्रस्थे सुषुवे मेनकाप्सराः ।
अवकीर्य च मां याता परात्मजमिवासती ॥ ७० ॥

किं नु कर्माशुभं पूर्वं कृतवत्यन्यजन्मनि ।
यदहं बान्धवैस्त्यक्ता बाल्ये संप्रति च त्वया ॥ ७१ ॥

कामं त्वया परित्यक्ता गमिष्यामि स्वमाश्रमम् ।
इमं तु बालं संत्यक्तुं नार्हस्यात्मजमात्मनः ॥ ७२ ॥

॥ दुष्यन्त उवाच ॥

न पुत्रमभिजानामि त्वयि जातं शकुन्तले ।
असत्यवचनानार्यः कस्ते श्रद्धास्यते वचः ॥ ७३ ॥

मेनका निरनुक्रोशा बन्धकी जननी तव ।
यया हिमवतः पृष्ठे निर्माल्यमिव चोज्झिता ॥ ७४ ॥

स चापि निरनुक्रोशः क्षत्रयोनिः पिता तव ।
विश्वामित्रो ब्राह्मणत्वे लुब्धः कामवशं गतः ॥ ७५ ॥

मेनकाप्सरसां श्रेष्ठा महर्षीणां पिता च ते ।
तयोरपत्यं कस्मात्त्वं पुंश्चलीव प्रभाषसे ॥ ७६ ॥

अश्रद्धेयमिदं वाक्यं कथयन्ती न लज्जसे ।
विशेषतो मत्सकाशे दुष्टतापसि गम्यताम् ॥ ७७ ॥

क्व महर्षिः स चैवाग्र्यः साप्सराः क्व च मेनका ।
क्व च त्वमेवं कृपणा तापसीवेषधारिणी ॥ ७८ ॥

अतिकायश्च ते पुत्रो बालोतिबलवानयम् ।
कथमल्पेन कालेन शालस्तम्भ इवोद्गतः ॥ ७९ ॥

सुनिकृष्टा च ते योनिः पुंश्चलीव प्रभाषसे ।
यदृच्छया कामरागादजाता मेनकया ह्यसि ॥ ८० ॥

Digitized by Google

सर्वमेतत्परोक्षं मे यत्त्वं वदसि तापसि ।
नाहं त्वामभिजानामि यथेष्टं गम्यतां त्वया ॥ ८१ ॥

॥ शकुन्तलोवाच ॥

राजन्सर्षपमात्राणि परच्छिद्राणि पश्यसि ।
आत्मनो विल्वमात्राणि पश्यन्नपि न पश्यसि ॥ ८२ ॥
मेनका त्रिदशेष्वेव त्रिदशाश्चानु मेनकाम् ।
ममैवोद्विज्यते जन्म दुष्यन्त तव जन्मनः ॥ ८३ ॥
क्षितावटसि राजेन्द्र अन्तरिक्षे चराम्यहम् ।
आवयोरन्तरं पश्य मेरुसर्षपयोरिव ॥ ८४ ॥
महेन्द्रस्य कुबेरस्य यमस्य वरुणस्य च ।
भवनान्यनुसंयामि प्रभावं पश्य मे नृप ॥ ८५ ॥
सत्यश्चापि प्रवादोयं यं प्रवक्ष्यामि तेनघ ।
निदर्शनार्थं न द्वेषाच्छ्रुत्वा तं क्षन्तुमर्हसि ॥ ८६ ॥
विरूपो यावदादर्शे नात्मनः पश्यते मुखम् ।
मन्यते तावदात्मानमन्येभ्यो रूपवत्तरम् ॥ ८७ ॥
यदा स्वमुखमादर्शे विकृतं सोभिवीक्षते ।
तदान्तरं विजानीते आत्मानं चेतरं जनम् ॥ ८८ ॥
अतीव रूपसंपन्नो न कंचिदवमन्यते ।
अतीव जल्पन्दुर्वाचो भवतोह विहेठकः ॥ ८९ ॥
मूर्खो हि जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
अशुभं वाक्यमादत्ते पुरीषमिव सूकरः ॥ ९० ॥
प्राज्ञस्तु जल्पतां पुंसां श्रुत्वा वाचः शुभाशुभाः ।
गुणवद्वाक्यमादत्ते हंसः क्षीरमिवांभसः ॥ ९१ ॥

Digitized by Google

अन्यान्परिवदन्साधुर्यथाहि परितप्यते ।
तथा परिवदन्नन्यांस्तुष्टो भवति दुर्जनः ॥ ९२ ॥
अभिवाद्य यथावृद्धान्सन्तो गच्छन्ति निर्वृतिम् ।
एवं सज्जनमाक्रुश्य मूर्खो भवति निर्वृतः ॥ ९३ ॥
सुखं जीवन्त्यदोषज्ञा मूर्खा दोषानुदर्शिनः ।
यत्र वाच्याः परैः सन्तः परानाहुस्तथाविधान् ॥ ९४ ॥
अतो ह्यस्यतरं लोके किञ्चिदन्यत्र विद्यते ।
यत्र दुर्जनमित्याह दुर्जनः सज्जनं स्वयम् ॥ ९५ ॥
सत्यधर्मच्युतात्पुंसः क्रुद्धादाशीविषादिव ।
अनास्तिकोऽप्युद्विजते जनः किं पुनरास्तिकः ॥ ९६ ॥
स्वयमुत्पाद्य वै पुत्रं सदृशं यो न मन्यते ।
तस्य देवाः श्रियं घ्नन्ति न च लोकानुपाश्नुते ॥ ९७ ॥
कुलवंशप्रतिष्ठां हि पितरः पुत्रमब्रुवन् ।
उत्तमं सर्वधर्माणां तस्मात्पुत्रं न संत्यजेत् ॥ ९८ ॥
स्वपत्नीप्रभवान्यञ्च लब्धान्क्रीतान्विवर्धितान् ।
कृतानन्यासु चोत्पन्नान्पुत्रान्वै मनुरब्रवीत् ॥ ९९ ॥
धर्मकीर्त्यावहा नृणां मनसः प्रीतिवर्धनाः ।
त्रायन्ते नरकाज्जाताः पुत्रा धर्मप्लवाः पितॄन् ॥ १०० ॥
स त्वं नृपतिशार्दूल पुत्रं न त्यक्तुमर्हसि ।
आत्मानं सत्यधर्मौ च पालयन्पृथिवीपते ॥ १ ॥
नरेन्द्रसिंह कपटं न वोढुं त्वमिहार्हसि ।
वरं कूपशताद्वापी वरं वापीशतात्क्रतुः ॥ २ ॥
वरं क्रतुशतात्पुत्रः सत्यं पुत्रशताद्वरम् ।
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ॥ ३ ॥

Digitized by Google

अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ।
सर्ववेदाधिगमनं सर्वतीर्थावगाहनम् ॥ ४ ॥
सत्यं च वचनं राजन्समं वा स्यान्न वा समम् ।
नास्ति सत्यसमो धर्मो न सत्याद्विद्यते परम् ॥ ५ ॥
नहि तीव्रतरं किंचिदनृतादिह विद्यते ।
राजन्सत्यं परं ब्रह्म सत्यं च समयः परः ॥ ६ ॥
मा त्याक्षीः समयं राजन्सत्यं संगतमस्तु ते ।
अनृतेचेत्प्रसङ्गस्ते श्रद्दधासि न चेत्स्वयम् ॥ ७ ॥
आत्मना हन्त गच्छामि त्वादृशे नास्ति संगतम् ।
त्वामृतेपि हि दुष्यन्त शैलराजावतंसकाम् ॥ ८ ॥
चतुरन्ताभिमामुर्वीं पुत्रो मे पालयिष्यति ।

॥ वैशंपायन उवाच ॥

एतावदुक्त्वा राजानं प्रातिष्ठत शकुन्तला ॥ ९ ॥
अथान्तरिक्षाद्दुष्यन्तं वागुवाचाशरीरिणी ।
ऋत्विक्पुरोहिताचार्यैर्मन्त्रिभिश्च वृतं तदा ॥ १० ॥
भस्त्रा माता पितुः पुत्रो येन जातः स एव सः ।
भरस्व पुत्रं दुष्यन्त मावमंस्थाः शकुन्तलाम् ॥ ११ ॥
रेतोधाः पुत्रं नयति नरदेव यमक्षयात् ।
त्रायस्व चास्य धाता गर्भस्य सत्यमाह शकुन्तला ॥ १२ ॥
जाया जनयते पुत्रमात्मनोङ्गं द्विधाकृतम् ।
तस्माद्भरस्व दुष्यन्त पुत्रं शाकुन्तलं नृप ॥ १३ ॥
अभूतिरेषा यत्त्यक्त्वा जीवेज्जीवन्तमात्मजम् ।
शाकुन्तलं महात्मानं दौष्यन्तिं भर पौरव ॥ १४

Digitized by Google

भर्तव्योयं त्वया यस्मादस्माकं वचनादपि ।
तस्माद्भवत्वयं नाम्ना भरतो नाम ते सुतः ॥ १५ ॥
तच्छ्रुत्वा पौरवो राजा व्याहृतं त्रिदिवौकसाम् ।
पुरोहितममात्यांश्च संप्रहृष्टोब्रवीदिदम् ॥ १६ ॥
शृण्वन्त्वेनद्भवन्तोस्य देवदूतस्य भाषणम् ।
अहं चाप्येवमेवैनं जानामि स्वयमात्मजम् ॥ १७ ॥
यद्यहं वचनादेव गृह्णीयामि स्वमात्मजम् ।
भवेद्धि शङ्कितो लोकस्य नैव शुद्धो भवेदयम् ॥ १८ ॥

॥ वैशंपायन उवाच ॥

तं विशोध्य तदा राजा देवदूतेन भारत ।
हृष्टः प्रमुदितश्चापि प्रतिजग्राह तं सुतम् ॥ १९ ॥
ततस्तस्य तदा राजा पितृकर्माणि सर्वशः ।
कारयामास मुदितः प्रीतिमानात्मजस्य ह ॥ २० ॥
मूर्ध्नि चैनमुपाघ्राय सस्नेहं परिषस्वजे ।
स भाज्यमानो विप्रैश्च स्तूयमानश्च वन्दिभिः ॥ २१ ॥
स मुदं परमां लेभे पुत्रसंस्पर्शजां नृपः ।
तां चैव भार्यां दुष्यन्तः पूजयामास धर्मतः ॥ २२ ॥
अब्रवीच्चैव तां राजा शान्त्वपूर्वमिदं वचः ।
कृतो लोकपरोक्षोयं संबन्धोयं त्वया सह ॥ २३ ॥
तस्मादेतन्मया देवि त्वच्छुद्ध्यर्थं विचारितम् ।
मन्यते चैव लोकस्ते स्त्रीभावान्मयि संगतम् ॥ २४ ॥
पुत्रश्चायं वृतो राज्ये मया तस्माद्विचारितम् ।
यच्चकोपि तयात्यर्थं त्वयोक्तोस्म्यप्रियं प्रिये ॥ २५ ॥
प्रणयिन्या विशालाक्षि तत्क्षान्तं ते मया शुभे ।
तामेव मुक्त्वा राजर्षिर्दुष्यन्तो महिषीं प्रियाम् ॥ २६ ॥



Digitized by Google

धनैरभिरन्नपानैश्च पूजयामास भारत ।
दुष्यन्तस्तु तदा राजा पुत्रं शाकुन्तलं तदा ॥ २७ ॥
भरतं नामतः कृत्वा यौवराज्येऽभ्यषेचयत् ।
तस्य तत्प्रथितं चक्रं प्रावर्तत महात्मनः ॥ २८ ॥
भास्वरं दिव्यमजितं लोकसंनादनं महत् ।
स विजित्य महीपालांश्चकार वशवर्तिनः ॥ २९ ॥
चचार च सतां धर्मं प्राप चानुत्तमं यशः ।
स राजा चक्रवर्त्यासीत्सार्वभौमः प्रतापवान् ॥ ३० ॥
ईजे च बहुभिर्यज्ञैर्यथा शक्रो मरुत्पतिः ।
याजयामास तं कण्वो विधिवज्जूरिदक्षिणाम् ॥ ३१ ॥
श्रीमान्गोवितनं नाम वाजिमेधमवाप सः ।
यस्मिन्सहस्रं पद्मानां कण्वाय भरतो ददौ ॥ ३२ ॥
भरताद्भारती कीर्तिर्येनेदं भारतं कुलम् ।
अपरे ये च पूर्वे वै भारता इति विश्रुताः ॥ ३३ ॥
भरतस्यान्ववायेहि देवकल्पा महौजसः ।
बभूवुर्ब्रह्मकल्पाश्च बहवो राजसत्तमाः ॥ ३४ ॥
येषामपरिमेयानि नामधेयानि सर्वशः ।
तेषां तु ते यथा मुख्यं कीर्तयिष्यामि भारत ॥ ३५ ॥
महाभागान्देवकल्पान्सत्यार्जवपरायणान् ।
॥ इति श्रीमहाभारते आदिपर्वणि संभवपर्वणि शकुन्तलोपाख्याने सप्तमोध्यायः ॥ ७ ॥

॥ समाप्तेयं शंकररत्नावली ॥

Digitized by Google

This book is a preservation photocopy.
It was produced on Hammermill Laser Print natural white,
a 60 # book weight acid-free archival paper
which meets the requirements of
ANSI/NISO Z39.48-1992 (permanence of paper)

Preservation photocopying and binding
by
Acme Bookbinding
Charlestown, Massachusetts
1996

Digitized by Google